श्रीः ।

प्राकृतप्रकाशः

विद्वद्वरश्रीमद्भामहविरचितः ।

पण्डितकुलतिलकश्रीमद्वररुचिरचित-
सूत्रसमलङ्कृतः ।

वाराणसेयराजकीयप्रधानसंस्कृतपाठशालायाम्
साहित्यशास्त्राध्यापकेन

मानवल्ल्युपाख्यतैलङ्गरामशास्त्रिणा
संशोधितः ।

PRAKRITA PRAKASHA

BY

PANDITA BHAMAHA

with the sutras of Vararuchi

RIVISED BY

PANDIT RAMA SHASTRI TAILANGA

Professor, Government Sanskrit College, Benares.

Published and sold
BY
HARI DASA GUPTA
Secretary
Chowkhamba Sanskrit Book Depot, Benares City.
Publication No. 13

BENARES:
PRINTED AT THE HARIPRAKASH PRESS

1899.

First Edition] [1000 Copies.

विज्ञप्तिः।

निम्नलिखितानि पुस्तकानि साधु संशोध्य सीसकाक्षरैः पुनरस्माभिर्मुद्रितानि, येषां जिघृक्षा स्यात्तैरस्माकं सविधे प्रार्थनीयानि ॥

संख्या	पुस्तकानि	मूल्यम् रु०	आ०	पा०
१	भैरवी [कारकान्ता] शब्दरत्नव्याख्या	२	०	०
२	प्रश्नवैष्णवः	०	८	०
३	परिभाषेन्दुशेखरः भैरवीसहितः	१	४	०
४	अर्थसंग्रहः कौमुदीव्याख्यायुतः	१	८	०
५	शुद्धिदीपिका [धर्मशास्त्रे आशौचकाण्डम्]	०	२	०
६	तत्त्वबोधिनी	४	०	०
७	काशिकावृत्तिः [cancelled.]			
८	गायत्रीतन्त्रम्	०	८	०
९	स्वर्णाकर्षणभैरवपञ्चाङ्गम्	०	४	०
१०	धातुपाठः	०	२	०
११	"चौखम्बा-संस्कृत ग्रन्थमाला" प्रतिखण्डम्	१	०	०
१२	कारिकावली मुक्तावली दिनकरी रामरुद्री [शब्दखण्डमात्रम्]	१	४	०
१३	प्राकृत प्रकाशः	०	८	०

एतदन्यानि कानि चित्पुस्तकान्यपेक्षितानि चेदस्मत्कार्यालयस्थपुस्तकानां बृहत्सूची आणकार्धं संप्रेष्य द्रष्टव्या ॥

कार्य्याध्यक्षः

पत्रादिप्रेषण स्थानम् } चौखम्बासंस्कृतपुस्तकालयस्य काशी (बनारस सिटी)

श्रीगणेशाय नमः ।

प्राकृतप्रकाशः ।

जयति मदमुदितमधुकरमधुररुताकलनकूणितापाङ्गः।
करविहितगण्डकण्डूविनोदसुखितो गणाधिपतिः॥१॥
वररुचिरचितप्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण ।
बुद्ध्वा चकार वृत्तिं संक्षिप्तां भामहः स्पष्टाम् ॥ २ ॥

आदेरतः ॥ १ ॥ आ समृद्ध्यादिषु वा ॥ २ ॥
इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाऽङ्गारेषु ॥ ३ ॥
लोपो ऽरण्ये ॥ ४ ॥ एं शय्यादिषु ॥ ५ ॥ ओ बदरे
देन ॥ ६ ॥ लवणनवमल्लिकयोर्वेन ॥ ७ ॥

अधिकारोयम् । यदित ऊर्ध्वमनुक्रमिष्यामः आदेरतः स्थाने तद्भवतीत्यवं वेदितव्यम् । आदेरित्येतदा परिच्छेदसमाप्तेः । अत इति तकारग्रहणं सवर्णनिवृत्त्यर्थम् ॥ १ ॥ समृद्धि इत्येवमादिषु शब्देष्वादेरकारस्याकारो भवति वा । समिद्धी सामिद्धी । पअडं पाअडं । अहिजाई आहिजाई । मणंसिणी माणंसिणी । पडिवआ पाडिवआ । सरिच्छं सारिच्छं । पडिसिद्धी पाडिसिद्धी । पसुत्तं पासुत्तं । पसिद्धी पासिद्धी । असो आसो । समृद्धि, प्रकट, अभिजाति, मनस्विनी, प्रतिपदा, सदृश, प्रतिषिद्धि, प्रसुप्त, प्रसिद्धि, अश्व । आकृतिगणोयम् ॥ २ ॥ ईषदादिषु शब्देषु आदेरतः स्थाने इकारादेशो भवति । वेति निवृत्तम् । इसि पिक्कं सिविणो वेडिसो विअणो इंगो इंगालो॥३॥अरण्यशब्दे आदेरतो लोपो भवति । रण्णं ॥ ४ ॥ शय्या इत्येवमादिषु शब्देषु आदेरत एकारादेशो भवति । सेज्जा सुंदेरं । उक्केरो तेरहो । अच्छेरं । पेरन्तं । वेल्ली । शय्यासौन्दर्य्योत्करत्रयोदशाश्चर्यपर्यन्तवल्ल्यः ॥ ५ ॥ बदरशब्दे दकारेण सहादेरत ओत्वं भवति । बोरं ॥ ६ ॥ लवणनवमल्लिकयोरादेरतो वकारेण सह ओकारः स्यात् । लोणं णोमल्लिआ ॥ ७ ॥

मयूरमयूखयोर्व्वा वा ॥८॥ चतुर्थीचतुर्दश्योस्तुना॥९॥ अदातो यथादिषु वा ॥ १० ॥ इत्सदादिषु ॥ ११ ॥ इत एत् पिण्डसमेषु ॥ १२ ॥ अत् पथिहरिद्रापृथिवीषु ॥ १३ ॥ इतेस्तः पदादेः ॥ १४ ॥ उदिक्षुवृश्चिकयोः ॥१५॥ ओ च द्विधा कृञः ॥ १६ ॥ ईत् सिंहजिह्वयोश्च ॥ १७ ॥ इदीतः पानीया-

---

मयूर मयूख इत्येतयोर्यूशब्देन सहादेरत ओत्वं वा भवति ॥ मोरो मऊरो । मोहो मऊहो ॥ ८ ॥ एतयोस्तुना सहादेरत ओत्वं भवति वा ॥ चोत्थी चउत्थी । चोद्दही चउद्दही ॥ ९ ॥ अत इति निवृत्तम् । यथा इत्येवमादिषु आतः स्थाने अकारादेशो भवति वा । जह जहा । तह तहा । पत्थरो पत्थारो । पउअं पाउअं । तलवेण्टअं तालवेण्टअं । उक्खअं उक्खाअं । चमरं चामरं । पहरो पहारो । चडु चाडु । दवग्गी दावग्गी । खइअं खाइअं । संठविअं संठाविअं । हलिओ हालिओ । यथा तथा प्रस्तार प्राकृत तालवृन्तकोत्खात चामर प्रहर चाटु दावाग्नि खादित संस्थापित हालिकाः ॥ १० ॥ सदा इत्येवमादिष्वात इकारो भवति वा ॥ सइ सआ । तइ तआ । जइ जआ । सदा तदा यदा ॥ ११ ॥ पिण्ड इत्येवंसमेषु इकारस्यैकारादेशो भवति वा ॥ पेण्डं पिण्डं णेद्दा णिद्दा सेंदूरं सिंदूरं धम्मिल्लं धाम्मिल्लं चेंधं चिंधं वेण्हू विण्हू पेट्ठं पिट्ठं । पिण्ड निन्द्रा सिन्दूर धम्मिल्ल चिन्ह विष्णु पिष्टानि । समग्रहणं संयोगपरस्योपलक्षणार्थम् ॥१२॥ पथ्यादिषुशब्देषु इकारस्याकारो भवति ॥ पहो हलद्दा पुहवी ॥ १३ ॥ पदादेरितिशब्दस्य यस्तकारस्तस्मात् परस्येकारस्य अकारो भवति । इअ उह अण्णह वअणं । इअ विअसन्तीउ चिरं । इति पश्यतान्यथावचनम् । इति विकसन्त्यश्चिरम् । पदादेरिति वचनादिह न भवति । पिओत्ति । प्रिय इति ॥ १४ ॥ इक्षुवृश्चिकयोरित उत्वं भवति । उच्छू । विच्छुओ ॥ १५ ॥ कृञ्धातुप्रयोगे द्विधाशब्दस्यौकारो भवति चकारादुत्वं च । द्विधा कृतम् दोहाइअं । द्विधा क्रियते दोहाइज्जइ दुहाइज्जइ ॥१६॥ एतयोरादेरिकारस्य ईकारो भवति । सीहो जीहा । चकारोऽनुक्तसमुच्चयार्थः, तेन वीसत्थ वीसभं

दिषु ॥ १८ ॥ एन्नीडापीडकीदृगीदृशेषु ॥ १९ ॥ उत ओत् तुण्डरूपेषु ॥ २० ॥ उलूखले ल्वा वा ॥ २१ ॥ अन्मुकुटादिषु ॥ २२ ॥ इत्पुरुषे रोः ॥ २३ ॥ उद्‌ऊतो मधूके ॥ २४ ॥ अद् दुकूले वा लस्य द्वित्वम् ॥ २५ ॥ एन्नूपुरे ॥ २६ ॥ ऋतोऽत् ॥ २७ ॥ इदृष्यादिषु ॥ २८ ॥ उदृत्वादिषु ॥ २९ ॥ ऋ रीति ॥ ३० ॥

इत्येवमादिषु ईत्वं भवति ॥ १७ ॥ पानीय इत्येवमादिष्वादेरीकारस्य इकारो भवति । पाणिअं अलिअं तआणिं करिसो दुइअं तइअं गहिरं । पानीयाऽलीकतदानींकरीषद्वितीयतृतीयगभीराः ॥ १८ ॥ नीडादिष्वीकारस्यैकारो भवति । णेडं आपेडो केरिसो एरिसो ॥ १९ ॥ तुण्ड इत्येवंरूपेषु आदेरुकारस्यौकारो भवति । तोण्डं मोत्ता पोक्खरो पोत्थओ लोद्धओ कोट्टिमं । तुण्डमुक्तापुष्करपुस्तकलुब्धककुट्टिमानि । रूपग्रहणं संयोगपरोपलक्षणार्थम् ॥ २० ॥ उलूखलशब्दे लेन सह उकारस्यौकारो भवति वा । ओखलं उलूखलं ॥ २१ ॥ मुकुट इत्येवमादिष्वादेरुकारस्य स्थाने अकारो भवति । मउडं मउलं गरुइ जहिट्ठिलो सोअमल्लं अवरि । मुकुटमुकुलगुरुगुर्वीयुधिष्ठिरसौकुमार्योपरयः ॥ २२ ॥ पुरुषशब्दे यो रुस्तस्य इकारो भवति । पुरिसो ॥ २३ ॥ मधूकशब्दे ऊकारस्य उकारो भवति । महुअं ॥ २४ ॥ दुकूलशब्दे ऊकारस्याकारो भवति वा, तत्संयोन लकारस्य द्वित्वम् । दुअल्लं दुऊलं ॥ २५ ॥ नूपुरशब्दे ऊकारस्य एकारो भवति । णेउरं ॥ २६ ॥ आदेर्ऋकारस्याकारो भवति । तणं घणा मअं कअं वद्धो वसहो । तृणघृणाऽमृतकृतवृद्धवृषभाः ॥ २७ ॥ ऋष्यादिषु शब्देषु आदेर्ऋकारस्य इकारो भवति । इसी विसी गिट्ठि दिट्ठि सिट्ठि सिङ्गारो हिअंको भिङ्गो भिङ्गारो हिअअं बिइणाहो विहअं किसरो किच्चा विच्छुओ सिआलो किई किसो । ऋषिवृषिगृष्टिदृष्टिसृष्टिशृङ्गारमृगाङ्कभृङ्गभृङ्गारहृदयवितृष्णबृंहितकृशरकृत्यावृश्चिकशृगालकृतिकृषिकृपाः ॥ २८ ॥ ऋतु इत्येवमादिषु आदेर्ऋत उकारो भवति । उदू मुणालो पुहवी वुंदावणं पाउसो पउत्ती णिउदं संवुदं णिव्वुदं वुत्तंतो परहुओ मा-

वृक्षे वेन रुर्वा ॥ ३१ ॥ ऌ क्लृप्तइलिः ॥ ३२ ॥ एत इद्वेदनादेवरयोः ॥ ३३ ॥ ॥ ऐत एत् ॥ ३४ ॥ दैत्यादिष्वइ ॥ ३५ ॥ दैवे वा ॥ ३६ ॥ इत्सैन्धवे ॥ ३७ ॥ ईद् धैर्ये ॥ ३८ ॥ ओतोद्वा प्रकोष्ठे कस्य वः ॥ ३९ ॥ औत ओत् ॥ ४० ॥ पौरादि-

---

उओ जामाउओ । ऋतु, मृणाल, पृथिवी, वृन्दावन, प्रावृष् , प्रवृत्ति, निवृत, संवृत, निर्वृत, वृत्तान्त, परभृत, मातृक, जामातृक, इत्येवमादयः ॥ २९ ॥ वर्णान्तरेणायुक्तस्यादेर्ऋकारस्य रिकारो भवति । रिणं रिद्धो रिच्छो । क्व चिद्युक्तस्यापि । वर्णान्तरेण युक्तस्यापि क्व चिदृकारस्य रिकारो भवति । एरिसो सरिसो तारिसो ॥ ३० ॥ वृक्षशब्दे वशब्देन सह ऋकास्य रुकारो भवति वा । रुक्खो वच्छो । व्यवस्थितविभाषाज्ञापनाच्छत्वपक्षे न भवति खत्वपक्षे तु नित्यमेव भवति ॥ ३१ ॥ क्लृप्तशब्दे ऌकारस्य इलीत्ययमादेशो भवति । किलित्तं । तदेवमादेशान्तरविधानात्प्राकृते ऋकारऌकारौ न भवतः॥३२॥ वेदनादेवरयोरेकारस्य इकारो भवति । विअणा दिअरो । वाग्रहणानुवृत्तेः क्व चिद् वेअणा देअरो इत्यपि ॥ ३३ ॥ आदेरैकारस्य एकारो भवति । सेलो सेत्तं एरावणो केलासो तेल्लोक्कं । शैलशैत्यैरावणकैलासत्रैलोक्यानि ॥ ३४ ॥ दैत्यादिषु शब्देषु ऐकारस्य अइ इत्ययमादेशो भवति । दइच्चो चइत्तो भइरवो सइरं वइरं वइदेसो वइदेहो कइअवो वइसाहो वइसिओ वइसंपाअण । दैत्यचैत्रभैरवस्वैरवैरवैदेशवैदेहकैतववैशाखवैशिकवैशम्पयनाः । इत्यादयः ॥ ३५ ॥ दैवशब्दे ऐकारस्य अइ इत्ययमादेशो भवति वा । दइव्वं देव्वं । अनादेशपक्षे नीडादित्वाद् द्वित्वम् ॥ ३६ ॥ सैन्धवशब्दे ऐकारस्य इकारो भवति । सिंधवं ॥ ३७ ॥ धैर्यशब्दे ऐकारस्य ईकारो भवति । धीरं ॥ ३८ ॥ प्रकोष्ठशब्दे ओकारस्य अकारो भवति वा तत्संयोगेन च ककारस्य वत्त्वम् । पवट्ठो । पओट्ठो ॥ ३९ ॥ औकारस्यादेरोकारो भवति । कोमुई जोव्वणं कोत्थुहो कोसंवी । कौमुदी यौवनम् कौस्तुभः कौशाम्बी ॥ ४० ॥ पौर इत्येवमादिषु शब्देषु औकारस्य अउ इत्ययमा-

ष्वउ ॥ ४१ ॥ आ च गौरवे ॥ ४२ ॥ उत्सौन्दर्यादिषु ॥ ४३ ॥

इति वररुचिकृतप्राकृतसूत्रेषु अज्विधिर्नाम प्रथमः परिच्छेदः ॥

अथ द्वितीयः परिच्छेदः ।

अयुक्तस्यानादौ ॥ १ ॥ कगचजतदपयवां प्रायो लोपः ॥ २ ॥

देशो भवति । पउरो कउरवो पउरिसो । पौरकौरवपौरुषाणि । आकृतिगणोयम् । कौशले विकल्पः ‡ । कोसलो कउसलो । कौशलम् ॥ ४१ ॥ गौरवशब्दे औकारस्य आकारो भवति । चकारादुत्वं च ॥ गारवं गउरवं ॥ ४२ ॥ सौन्दर्य इत्येवमादिषु औकारस्य उकारो भवति । सुन्देरं मुञ्जाअणो सुण्डो कुक्खेअओ दुव्वारिओ ॥ सौन्दर्यमौञ्जायनशौण्डकौक्षेयकदौवारिकाः ॥ ४३ ॥

इति भामहविरचिते प्राकृतप्रकाशे प्रथमः परिच्छेदः ॥

अधिकारो ऽयम् । इत उत्तरं यद्वक्ष्यामस्तदयुक्तस्य व्यञ्जनस्यानादौ वर्तमानस्य कार्यं भवतीत्येवं वेदितव्यम् । वक्ष्यति कादीनां लोपः । मउडं । अयुक्तस्येति किम् । अग्घो अक्को । आनादौ इति किम् । कमलं । अयुक्तस्येत्या परिच्छेदसमाप्तेः । अनादाविति च आ जकारविधानात् ॥ १ ॥ कादीनां नवानां वर्णानामयुक्तानामनादौ वर्तमानानां प्रायो बाहुल्येन लोपो भवति । कस्य तावत्, मउलो णउलं । गस्य, साअरो णअरं । चस्य, वअणं सूई । जस्य, गओ रअदं । तस्य, कअं विआणं । दस्य, गआ मओ । पस्य, कई विउलं सुउरिसो । पुरिस इति यद्यपि उत्तरपदस्य पुरुषशब्दस्यादिस्तथापि लोपो भवतीत्यनेन ज्ञापयति वृत्तिकारः यथा उत्तरपदादिरनादिरेवेति । यस्य, वाउ णअणं । वस्य, जीअं दिअहो । मुकुलनकुलसागरनगरवचनसूचीगजरजतकृतवितानगदामदकपिविपुलसुपुरुषवायुनयनजीवदिवसाः । प्रायोग्रहणाद्यत्र श्रुतिसुखमस्ति तत्र न भवत्येव । सुकुसुमं पिअग-

यमुनायां मस्य ॥ ३ ॥ स्फटिकनिकषचिकुरेषु कस्य हः ॥ ४ ॥ शीकरे भः ॥ ५ ॥ चन्द्रिकायां मः ॥ ६ ॥ ऋत्वादिषु तो दः ॥ ७ ॥ प्रतिसरवेतसपताकासु डः ॥ ८ ॥ वसतिभरतयोर्हः ॥ ९ ॥ गर्भिते णः ॥ १० ॥ ऐरावते च ॥ ११ ॥ प्रदीप्तकदम्बदोहदेषु दो लः ॥१२॥ गद्गदे रः ॥१३॥ संख्यायाञ्च ॥ १४ ॥ पो वः ॥ १५ ॥ आपीडे

मणं सचावं अवजलं अतुलं आदरो अपारो अजसो सबहुमाणं। सुकुसुमप्रियगमनसचापापजलातुलादरापारायशस्सबहुमानानि। अयुक्तस्येत्येव। सक्को मग्गो। शक्रः मार्गः। अनादावित्येव। कालो गंधो। कालः गन्धः ॥ २ ॥ यमुनाशब्दे मकारस्य लोपो भवति। जउणा ॥ ३ ॥ अनादाविति वर्तते। एषु कस्य हकारो भवति॥ लोपापवादः। फरिहो णिहसो चिहुरो ॥ ४ ॥ शीकरशब्दे ककारस्य भकारो भवति। सीभरो। चन्द्रिकाशब्दे ककारस्य मकारो भवति। चंदिमा ॥ ६ ॥ ऋतु इत्येवमादिषु तकारस्य दकारो भवति। उदू रअदं आअदो णिव्वुदी आउदी संवुदी सुइदी आइदी हदो संजदो विउदं संजादो संपदि पडिवद्दी। ऋतुरजतागतनिर्वृत्यावृतिसंवृतिसुकृत्याकृतिहतसंयतविवृतसंयातसंप्रतिप्रतिपत्तयः ॥ ७ ॥ एषु शब्देषु तकारस्य डकारो भवति। लोपापवादः। पडिसरो वेडिसो पडाआ॥८॥ वसतिभरतशब्दयोः सकारस्य हकारो भवति। वसही भरहो ॥ ९ ॥ गर्भितशब्दे तकारस्य णकारो भवति। गब्भिणं ॥ १० ॥ ऐरावतशब्दे तकारस्य णकारो भवति। एरावणो ॥११॥ एषु शब्देषु दकारस्य लकारो भवति। पलित्तं कलंबो दोहलो ॥ १२ ॥ गद्गदशब्दे दकारस्य रेफादेशो भवति। गग्गरो ॥ १३ ॥ संख्यावाचिनि शब्दे यो दकारस्तस्य रेफादेशो भवति। एआरह वारह तेरह। एकादश द्वादश त्रयोदश। अयुक्तस्येत्येव। नेह चउद्दह ॥ १४ ॥ पकारस्यायुक्तस्यानादिवर्तिनो वकारादेशो भवति। सावो सवहो उलवो। शापः शपथः उलपः। प्रायोग्रहणाद्यत्र लोपो न भवति तत्रायं विधिः ॥ १५ ॥ आ-

मः ॥१६॥ उत्तरीयानी ययोर्ज्जो वा ॥१७॥ छायायां हः ॥ १८ ॥ कबन्धे बो मः ॥१९॥ टो डः ॥२०॥ सटाशकटकैटभेषु ढः ॥ २१ ॥ स्फटिके लः ॥२२॥ डस्य च ॥२३॥ ठो ढः ॥२४॥ अङ्कोले ल्लः ॥२५॥ फो भः ॥२६॥ खघथधमां हः ॥२७॥ प्रथमशिथिलनिषधेषु ढः॥२८॥ कैटभे वः॥२९॥ हरिद्रादीनां रो लः॥३०॥

पीडशब्दे पकारस्य मकारो भवति । आमलो ॥ १६ ॥ उत्तरीयशब्दे ऽनीयप्रत्ययान्ते च यस्य ज्जो भवति वा । उत्तरीअं उत्तरिज्जं रमणीअं रमणिज्जं भरणीअं भरणिज्जं ॥ १७ ॥ छायाशब्दे यकारस्य हकारो भवति । छाहा ॥ १८ ॥ कबन्धशब्दे बकारस्य मकारो भवति । कमंधो ॥ १९ ॥ टस्यानादिदिवर्तिनो डकारो भवति । णडो विडवो ॥२०॥ एतेषु टकारस्य ढकारो भवति । सढा केढवो ॥ २१ ॥ स्फटिकशब्दे टकारस्य लकारो भवति । फलिहो ॥ २२ ॥ डकारस्यायुक्तस्यानादिभूतस्य लकारो भवति । दालिमं तलाअं वलही । प्राय इत्येव । दाडिमं वडिसं णिविडो ॥ २३ ॥ ठकारस्यायुक्तस्यानादिभूतस्य ढकारो भवति । मढं जढरं कढोरं ॥ २४ ॥ अङ्कोलशब्दे लकारस्य ल्लकारो भवति । अंकोल्लो ॥ २५ ॥ फकारस्यायुक्तस्यानादिभूतस्य भकारो भवति । सिभा सेभालिआ सभरी सभलं ॥ २६ ॥ खादीनाम्पञ्चानामयुक्तानामनादिवर्तिनां हकारो भवति । खस्य तावत्, मुहं मेहला । घस्य, मेहो गाहा सवहो । धस्य, राहा वहिरो । भस्य, सहा रासहो । प्राय इत्येव, पखलो पलंघणो अधीरो अधणो उबलद्धभावो । मुखम् मेखला मेघः गाथा शपथः राधा बधिरः सभा रासभः प्रखलः प्रलङ्घनः अधीरः अधनः उपलब्धभावः ॥ २७ ॥ एतेषु थधयोर्ढकारो भवति । पढमो सिढिलो ॥२८॥ कैटभशब्दे भकारस्य वकारो भवति । केढवो ॥ २९ ॥ हरिद्रा, इत्येवमादीनां रेफस्य लकारो भवति । हलद्दा चलणो मुहलो जहिट्ठिलो सोमालो कलुणं अंगुली इंगालो चिलादो फलिहा फलिहो । हरिद्रा, चरण, मुखर, युधिष्ठिर, सुकुमार, करुण, अङ्गुरी, अङ्गार, किरात, परिखा, परिघ, इत्येवमादयः ॥३०॥ अना-

आदेर्यो जः ।३१।यष्ट्यां लः ।३२।किराते चः।३३।कुब्जे खः ॥३४॥ दोलादण्डदशनेषु डः ॥३५॥ परुषपलितपरिखासु फः॥३६॥पनसे ऽपि॥३७॥बिसिन्यां भः॥३८॥ मन्मथे वः॥३९॥लाहले णः॥४०॥ षट्शावकसप्तपर्णानां छः ॥४१॥ नो णः सर्वत्र ॥४२॥शषोः सः॥४३॥ दशादिषु हः ॥ ४४ ॥ संज्ञायां वा ॥ ४५ ॥ दिवसे सस्य ॥४७॥ स्नुषायां ण्हः ॥ ४७ ॥

देरिति निवृत्तम्। आदिभूतस्य यकारस्य जकारो भवति ॥ जट्ठी जसो जक्खो । यष्टिः यशः यक्षः ॥३१॥ यष्टिशब्दे यकारस्य लकारो भवति लट्ठी ॥ ३२ ॥ किरातशब्दे आदेर्वर्णस्य चकारो भवति। चिलादो ॥ ३३ ॥ कुब्जशब्दे आदेर्वर्णस्य खकारो भवति । खुज्जो॥३४॥ एषु आदेर्वर्णस्य डकारो भवति ॥ डोला डंडो डसणो ॥ ३५ ॥ एतेषु आदेर्वर्णस्य फकारो भवति । फरुसो फलिहो फलिहा ॥ ३६ ॥ पनसशब्दे ऽपि पकारस्य फकारो भवति । फणसो ॥३७॥ बिसिनीशब्दे आदेर्वर्णस्य भकारो भवति। भिसिणी । स्त्रीलिङ्गनिर्देशादिह न भवति । बिसं ॥ ३८ ॥ मन्मथशब्दे आदेर्वर्णस्य वकारो भवति। वम्महो ॥ ३९ ॥ लाहलशब्दे आदेर्वर्णस्य णकारो भवति । णाहलो॥४०॥ एतेषामादेर्वर्णस्य छकारो भवति । छट्ठी छम्मुहो छावओ छत्तवण्णो। षष्ठी षण्मुखः शावकः सप्तपर्णः॥ ४१ ॥ आदेरिति निवृत्तम् । सर्वत्र नकारस्य णकारो भवति । णई कणअं वअणं माणंसिणी ॥४२॥ सर्वत्र शकारषकारयोस्सकारो भवति ॥ शस्य,सद्दो णिसा अंसो । षस्य, संठो वसहो कसाअं ॥ ४३ ॥ दश इत्येवमादिषु शकारस्य हकारो भवति। दह एआरह वारह तेरह ॥ ४४ ॥ संज्ञायां गम्यमानायां वा दशशब्दे शस्य हत्वं भवति। दहमुहो दसमुहो, दहबलो दसबलो, दहरहो दसरहो ॥ ४५ ॥ दिवसशब्दे सकारस्य हकारो भवति । दिअहो ॥ ४६ ॥ स्नुषाशब्दे षकारस्य ण्हकारो भवति । सोण्हा ॥ ४७॥

इति प्राकृतप्रकाशे द्वितीयः परिच्छेदः ॥

अथ तृतीयः परिच्छेदः ।

उपरिलोपः कगडतदपषसाम् ॥ १ ॥ अधो मनयाम् ॥ २ ॥ सर्वत्र लवराम् ॥ ३ ॥ द्रे रो वा॥४॥ सर्वज्ञतुल्येषु ञः ॥ ५ ॥ श्मश्रुश्मशानयोरादेः ॥६॥ मध्याह्ने हस्य ॥७॥ ह्नह्लह्मेषु नलमां स्थितिरूर्ध्वम् ॥ ८ ॥ युक्तस्य ॥ ९ ॥ ष्टस्य ठः ॥ १० ॥ अस्थनि ॥ ११ ॥ स्त-

---

कादीनामष्टानां युक्तस्योपरि स्थितानां लोपो भवति । कस्य तावत् भत्तं,सित्थओ । गस्य,मुद्धो सिणिद्धो । डस्य,खग्गो । तस्य,उप्पलं उप्पाओ । दस्य,मुग्गा मुग्गरो । पस्य,सुत्तो । षस्य, गोट्ठी णिट्ठुरो । सस्य, खलिअं णेहो । भक्तम् सिक्थकम् मुग्धः स्निग्धः खड्गः उत्पलम् उत्पातः मुद्गाः मुद्गरः सुप्तः गोष्ठी निष्ठुरः स्खलितम् स्नेहः ॥ १ ॥ मकारनकारयकाराणां युक्तस्याधःस्थितानां लोपो भवति । मस्य, सोस्सं रस्सी जुग्गं वग्गी । नस्य, णग्गो । यस्य, सोम्मो जोग्गो ॥ २ ॥ लकारवकाररेफाणां युक्तस्योपर्यधःस्थितानां लोपो भवति । लस्य,उक्का वक्कलं विक्कवो । वस्य,लुद्धओ पिक्कं । रस्य,अक्को सक्को ॥ उल्का वल्कलम् विक्लवः लुब्धकः पक्वम् । अर्कः शक्रः ॥ ३ ॥ द्रशब्दे रेफस्य वा लोपो भवति । दोहो द्रोहो चन्दो चन्द्रो रुद्दो रुद्रो॥ सर्वज्ञतुल्येषु ञकारस्य लोपो भवति । सव्वज्जो । इंगिअज्जो । जानातेर्यान्येवं रूपाणि तत्र ञलोपः ॥ ५ ॥ श्मश्रुश्मशानयोरादेर्वर्णस्य लोपो भवति । मस्सु मसाणं ॥ ६ ॥ मध्याह्नशब्दे हकारस्य लोपो भवति । मज्झण्णो ॥ ७ ॥ ह्न ह्ल ह्म इत्येतेषु अधः स्थितानां नकारलकारमकाराणां स्थितिरूर्ध्वमुपरिष्टाद्भवति । ह्नस्य,पुव्वण्हो । अवरण्हो । ह्लस्य, अल्हादो । ह्मस्य बम्हणो ॥ ८ ॥ अधिकारोऽयमा परिच्छेदसमाप्तेः,यदित ऊर्ध्वमनुक्रमिष्यामो युक्तस्येत्येवं वेदितव्यम्। वक्ष्यति अस्थनि अट्ठी । युक्तग्रहणं हलोऽन्त्यस्य मा भूत् ॥ ९ ॥ ष्ट इत्येतस्य युक्तस्य ठकारो भवति । लट्ठी दिट्ठी ॥ १० ॥ अस्थिशब्दे युक्तस्य ठकारो भवति। अट्ठी ॥११॥ स्तशब्दस्य थकारो

स्य थः ॥ १२ ॥ न स्तम्बे ॥ १३ ॥ स्तम्भे खः ॥ १४ ॥ स्थाणावहरे ॥ १५ ॥ स्फोटके ॥ १६ ॥ र्यशय्यभिमन्युषु जः ॥ १७ ॥ तूर्य्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः ॥ १८ ॥ सूर्ये वा ॥ १९ ॥ चौर्यसमेषु रिअं ॥ २० ॥ पर्यस्तपर्याणसौकुमार्येषु लः ॥ २१ ॥ र्तस्य टः ॥ २२ ॥ पत्तने ॥ २३ ॥ न धूर्तादिषु ॥ २४ ॥ गर्ते डः ॥ २५ ॥ गर्दभसंमर्दवितर्दिविच्छर्दिषु र्दस्य ॥ २६ ॥ त्यथ्यद्यां चछजाः ॥ २७ ॥

भवति। उपरिलोपापवादः। हत्थो समत्थो थुई थवओ कोत्थुहो। हस्तः समस्तः स्तुतिः स्तवकः कौस्तुभः ॥ १२ ॥ स्तम्बशब्दे स्तकारस्य थकारो न भवति। तंबो ॥ १३ ॥ स्तम्भशब्दे स्तकारस्य खकारो भवति। खंभो ॥१४॥ स्थाणुशब्दे युक्तस्य खकारो भवति,अहरे हरे ऽभिधेये न भवति। खाणू। अहर इति किम्। थाणू हरो।१५। स्फोटकशब्दे युक्तस्य खकारो भवति ॥ खोडओ ॥ १६ ॥ र्य इत्यस्य शय्याभिमन्युशब्दयोश्च युक्तस्य जकारो भवति। कज्जं सेज्जा अहिमज्जू ॥१७॥ एतेषु शब्देषु र्यस्य रेफो भवति। तूरं धीरं सुन्देरं अच्छेरं पेरंतं॥१८॥सूर्यशब्दे र्यकारस्य रेफादेशो भवति वा। सूरो सूज्जो। ॥ १९ ॥ चौर्यसमेषु शब्देषु र्यस्य रिअमित्यादेशो भवति। चोरिअं सोरिअं वीरिअं। चौर्यशौर्यवीर्याणि। समग्रहणादाकृतिगणोयम्॥२०॥ एषु शब्देषु र्यस्य लकारो भवति। पल्लत्थं पल्लाणं सोअमल्लं ॥ २१ ॥ र्त इत्येतस्य टकारो भवति। केवट्टओ णट्टओ णट्टई ॥ २२ ॥ पत्तनशब्दे युक्तस्य टकारो भवति। पट्टणं ॥ २३ ॥ धूर्त इत्येवमादिषु र्त इत्येतस्य टकारो न भवति। धुत्तो कित्ता वत्तमाणं वत्ता आवत्तो संवत्तओ णिवत्तओ वत्तिआ अत्तो कत्तरी मुत्ता। धूर्तः कीर्तिः वर्तमानम् वार्ता आवर्तः संवर्तकः निवर्तकः वर्तिका आर्तः कर्तरी मूर्तिः ॥ २४ ॥ गर्तशब्दे र्तस्य डकारो भवति। गड्डो ॥ २५ ॥ एतेषु र्दस्य डो भवति। गड्डहो संमड्डो विअड्डी विछड्डी ॥ २६ ॥ त्य थ्य द्य इत्येतेषां च छ ज

ध्यह्योर्झः ॥ २८ ॥ ष्कस्कक्षां खः ॥ २९ ॥ अक्ष्यादिषु च्छः ॥३०॥ क्षमावृक्षक्षणेषु वा ॥३१॥ ष्मपक्ष्मविस्मयेषु म्हः ॥ ३२ ॥ ह्नस्नष्णक्ष्णश्नां ण्हः ॥३३॥ चिन्हे न्धः ॥ ३४ ॥ ष्पस्य फः ॥ ३५ ॥ स्पस्य सर्वत्र स्थितस्य ॥ ३६ ॥ सि च ॥ ३७ ॥ बाष्पे अ-

---

इत्येते यथासंख्यं भवन्ति । त्यस्य, णिच्चं पच्चच्छं । थ्यस्य, रच्छा मिच्छा पच्छं । द्यस्य, विज्जा वेज्जं । नित्यम् प्रत्यक्षम् रथ्या मिथ्या पथ्यम् विद्या वैद्यः ॥२७॥ ध्य ह्य इत्येतयोर्झकारो भवति । ध्यस्य, मज्झं अज्झाओ । ह्यस्य, वज्झओ गुज्झओ । मध्यः अध्यायः वाह्यकः गुह्यकः ॥ २८ ॥ ष्कस्कक्षां खकारो भवति । ष्कस्य, सुक्खं पोक्खरो । स्कस्य, खंदो खंधो । क्षस्य, खदो जक्खो ॥ २९ ॥ अक्षि, इत्येवमादिषु क्षकारस्य च्छकारो भवति । अच्छी लच्छी छुण्णो छीरं छुद्धो उच्छित्तो सरिच्छं उच्छू अच्छा छारं रिच्छो मच्छिआ छुअं छुरं छेत्तं वच्छो कुच्छी कुच्छी । अक्षि, लक्ष्मी, क्षुण्ण, क्षीर, क्षुब्ध, उत्क्षिप्त, सदृक्ष, इक्षु, उक्षन्, क्षार, ऋक्ष, मक्षिका, क्षुत, क्षुर, क्षेत्र, वक्षस्, दक्ष, कुक्षि, इत्येवमादयः ॥३०॥ एतेषु क्षकारस्य छकारो भवति वा । छमा खमा वच्छो रुक्खो छणं खणं । वृक्षशब्दे ऋकारस्याकारे कृते क्षणशब्दे चोत्सवाभिधायिनि छत्वमिष्यते ॥ ३१ ॥ ष्म इत्येतस्य पक्ष्मविस्मयशब्दयोश्च युक्तस्य म्हकारो भवति ॥ ष्मस्य, गिम्हो उह्मा पम्हो विम्हओ ॥ ग्रीष्मः ऊष्म पक्ष्म विस्मयः ॥ ३२ ॥ ह्नादीनां ण्ह इत्ययमादेशो भवति । ह्नस्य, वणही सण्हु । स्नस्य, ण्हाणं पण्हुदं ष्णस्य, विण्हु कण्हो । क्ष्णस्य, सण्हं तिण्हं । श्नस्य, पण्हो सण्हो । वह्निः जह्नुः स्नानम् प्रस्नुतम् विष्णुः कृष्णः श्लक्ष्णः तीक्ष्णम् प्रश्नः शिश्नः ॥ ३३ ॥ चिन्हशब्दे युक्तस्य न्ध इत्ययमादेशो भवति । चिन्धं ॥ ३४ ॥ ष्प इत्येतस्य फ इत्ययमादेशो भवति । पुप्फं सप्फं णिप्फाओ ॥ पुष्पम् शष्पम् निष्पापः ॥ ३५ ॥ स्प इत्येतस्य सवत्रे स्थितस्य फ इत्ययमादेशो भवति । फंसो फंदणं । स्पर्शः स्पन्दनम् ॥३६॥ स्पस्य क्व चित् सि इत्ययमोशो भवति । पाडिसिद्धी प्रतिस्पर्द्धी । ॥ ३७ ॥ बाष्पशब्दे ष्प इत्येतस्य हकारो भवति अश्रुणि वाच्ये । बा-

श्रुणि हः ॥ ३८ ॥ कार्षापणे ॥ ३९ ॥ श्चत्सप्सां छः ॥ ४० ॥ वृश्चिके ञ्छः ॥ ४१ ॥ नोत्सुकोत्सवयोः ॥ ४२ ॥ न्मो मः ॥ ४३ ॥ म्नज्ञपञ्चाशत्पञ्चदशेषु णः ॥ ४४ ॥ तालवृन्ते ण्टः ॥ ४५ ॥ भिन्दिपाले ण्डः ॥ ४६ ॥ विह्वले भहौ वा ॥ ४७ ॥ आत्मनि पः ॥ ४८ ॥ क्मस्य ॥ ४९ ॥ शेषादेशयोर्द्वित्वमनादौ ॥ ५० ॥ वर्गेषु

हो । अश्रुणि किम् । बप्फो उप्फो । बाष्पः ऊष्मा ॥ ३८ ॥ कार्षापणशब्दे युक्तस्य हकारो भवति । काहावणो ॥ ३९ ॥ एतेषां छकारो भवति । श्चस्य, पच्छिमं अच्छेरं । त्सस्य, वच्छो वच्छरो । प्सस्य, लिच्छा जुगुच्छा । पश्चिमः आश्चर्यम् वत्सः वत्सरः लिप्सा जुगुप्सा ॥ ४० ॥ वृश्चिकशब्दे श्चकारस्य ञ्छ इत्ययमादेशो भवति । विञ्छुओ ॥ ४१ ॥ उत्सुक, उत्सव, इत्येतयोः त्स इत्येतस्य छकारो न भवति । श्चत्सप्सां छ इति प्राप्ते प्रतिषिध्यते । उस्सुओ उस्सवो ॥ ४२ ॥ न्म इत्येतस्य म इत्ययमादेशो भवति । अधोलोपे प्राप्ते । जम्मो मम्महो । जन्म मन्मथः ॥ ४३ ॥ म्न ज्ञ इत्येतयोः पञ्चाशत्पञ्चदशशब्दयोश्च युक्तस्य णकारो भवति । म्नस्य, पज्जुण्णो । ज्ञस्य, जण्णो विण्णाणं पण्णासा पण्णरहो । प्रद्युम्नः यज्ञः विज्ञानम् पञ्चाशत् पञ्चदश ॥ ४४ ॥ तालवृन्ते युक्तस्य ण्ट इत्ययमादेशो भवति । तालवेण्टअं ॥ ४५ ॥ भिन्दिपालशब्दे युक्तस्य ण्ड इत्ययमादेशो भवति । भिण्डिवालो ॥ ४६ ॥ विह्वलशब्दे युक्तस्य भकारहकारौ भवतो वा । विभलो विहलो ॥ ॥ ४७ ॥ आत्मशब्दे युक्तस्य पकारो भवति । अप्पा ॥ ४८ ॥ क्म इत्येतस्य पकारो भवति । रुप्पं रुप्पिणी । योगविभागो नित्यार्थः ॥ ४९ ॥ युक्तस्य यौ शेषादेशभूतौ तयोरनादौ वर्तमानयोर्द्वित्वं भवति । शेषस्य तावत्, भुत्तं भग्गो । आदेशस्य, लट्ठी दिट्ठी हत्थो । अनादाविति किम् । खलिअं खंभो थवओ भुक्तम् । मार्गः यष्टिः दृष्टिः हस्तः स्खलितम् स्तम्भः स्तवकः ॥ ५० ॥ युक्तस्य यौ शेषादेशावनादिभूतौ तयोर्द्वित्वेपि विहिते अध ऊर्ध्वे च यौ वर्गेषु वर्णौ द्वितीयश्चतुर्थौ वा

युजः पूर्वः ॥ ५१ ॥ नीडादिषु ॥ ५२ ॥ आम्रताम्रयोर्वः ॥ ५३ ॥ न रहोः ॥ ५४ ॥ आङो ज्ञस्य ॥ ५५ ॥ न बिन्दुपरे ॥ ५६ ॥ समासे वा ॥ ५७ ॥ सेवादिषु च ॥ ५८ ॥

विहितस्वस्य पूर्वः प्रथमस्तृतीयो वा भवति। वर्गेषु युग्मस्य द्वितीयस्य प्रथमः चतुर्थस्य तृतीयो द्वित्वेन विधीयते, अयुग्मयोः प्रथमतृतीयपञ्चमरूपयोः शेषादेशयोस्तु तावेव भवतः। शेषस्य, वक्खाणं अग्घो मुच्छा णिज्झरो लुद्धो णिब्भरो। आदेशस्य, दिट्ठी लट्ठी वच्छो विप्फरिसो णित्थारो जक्खो लच्छी अट्ठी पुप्फं। व्याख्यानम् अर्घः मूर्च्छा निर्झरः लुब्धः निर्भरः दृष्टिः यष्टिः वक्षः विस्पर्शः निस्तारः यक्षः लक्ष्मीः अस्थि पुष्पम् ॥ ५१ ॥ नीड इत्येवमादिषु अनादौ वर्तमानस्य च द्वित्वं भवति। णेड्डं एन्नीडापीडेत्यादिना एत्वम्। सोत्तं पेम्मं वाहित्तं उज्जुओ जण्णओ जोव्वणं। नीडम् स्रोतः प्रेम व्याहृतम् ऋजुः जनकः यौवनम् ॥ ५२ ॥ आम्र ताम्र इत्येतयोर्द्वित्वेन वकारो भवति। अव्वं तव्वं ॥ ५३ ॥ रेफहकारयोर्द्वित्वं न भवति। धीरं तूरं जीहा वाहो। धैर्यम् तूर्यम् जिह्वा बाष्पः ॥ ५४ ॥ आङ उत्तरस्य ज्ञ इत्येतस्यादेशस्य द्वित्वं न भवति। आणा आणत्ती। आज्ञा आज्ञप्तिः। आङ इति किम्। सण्णा। संज्ञा॥५५॥अनुस्वारपरे द्वित्वं न भवति संकंतो संझा। संक्रान्तः संध्या ॥ ५६ ॥ समासे शेषादेशयोर्वा द्वित्वं भवति। णइग्गामो णईगामो कुसुमप्पअरो कुसुमपअरो देवत्थुई देवथुई आणालक्खंभो आणालखंभो। नदीग्रामः कुसुमप्रकरः देवस्तुतिः आलानस्तम्भः ॥५७॥ सेवा इत्येवमादिषु चानादौ वा द्वित्वं भवति। सेव्वा सेवा एक्कं एअं णक्खो णहो देव्वं दइवं असिव्वं असिवं तेलोक्कं तेलोअं णिहित्तो णिहिओ तुह्णिक्को तुह्णिओ कण्णिआरो कणिआरो दिग्घं दीहं रत्ती राई दुक्खिओ दुहिओ अस्सो असो इस्सरो ईसरो विस्सासो वीसासो णिस्सासो णीसासो रस्सी रसी मित्तो मिओ पुस्सो पुसो। सेवा एकः नखः दैवम् अशिवम् त्रैलोक्यम् निहितम् तूष्णीकः कर्णिकारः दीर्घम् रात्रिः दुःखितः अश्वः ईश्वरः विश्वासः

विप्रकर्षः ॥ ५९ ॥ क्लिष्टश्लिष्टरत्नक्रियाशार्ङ्गेषु तत्स्वरवत्पूर्वस्य ॥ ६० ॥ कृष्णे वा ॥ ६१ ॥ इः श्रीह्रीक्रीतक्लान्तक्लेशम्लानस्वप्नस्पर्शहर्षार्हगर्हेषु ॥ ६२ ॥ अः क्ष्माश्लाघयोः ॥ ६३ ॥ स्नेहे वा ॥ ६४ ॥ उः पद्मतन्वीसमेषु ॥ ६५ ॥ ज्यायामीत् ॥ ६६ ॥

निश्वासः रश्मिः मित्रम् पुष्यः । उभयत्र विभाषेयम् । सेवादीनामप्राप्ते दीर्घादीनां च प्राप्ते ॥ ५८ ॥ अधिकारोऽयम् । आ परिच्छेदसमाप्तेर्युक्तस्य विप्रकर्षो भवति ॥ ५९ ॥ क्लिष्टादिषु युक्तस्य विप्रकर्षो भवति विप्रकृष्टस्य च यः पूर्वो वर्णो निरर्थस्तस्य तत्स्वरता भवति तेनैव पूर्वेण स्वरेण पूर्वो वर्णः सार्थो भवति इत्यर्थः । किलिट्ठं सिलिट्ठं रअणं किरिआ सारंगो ॥ ६० ॥ कृष्णशब्दे युक्तस्य वा विप्रकर्षो भवति पूर्वस्य च तत्स्वरता । व्यवस्थितविभाषेयम् । तेन वर्णे नित्यं विप्रकर्षः विष्णौ तु न भवत्येव ॥ कसणो कण्हो ॥ ६१ ॥ एषु युक्तस्य विप्रकर्षो भवति पूर्वस्य इकारः तत्स्वरता च भवति । सिरी किरीतो किलंतो किलेसो मिलाणं सिविणो फरिसो हरिसो अरिहो गरिहो । श्रीः ह्रीः क्रीतः क्लान्तः क्लेशः म्लानम् स्वप्नः स्पर्शः हर्षः अर्हः गर्हः ॥ ६२ ॥ क्ष्मा श्लाघा इत्येतयोर्युक्तस्य विप्रकर्षो भवति, पूर्वस्य अकारस्तत्स्वरता च भवति । खमा सलाहा ॥ ६३ ॥ स्नेहशब्दे युक्तस्य विप्रकर्षो वा भवति । पूर्वस्य च अकारस्तत्स्वरता भवति । सणेहो णेहो ॥ ६४ ॥ पद्मशब्दे तन्वी इत्येवंसमेषु च युक्तस्य विप्रकर्षो भवति पूर्वस्य च उकारस्तत्स्वरता च भवति । पउमं तणुई लहुई ॥ ६५ ॥ ज्याशब्दे युक्तस्य विप्रकर्षो भवति पूर्वस्य च ईकारस्तत्स्वरता च । जीआ ॥ ६६ ॥

इति प्राकृतप्रकाशे युक्तवर्णविधिर्नाम

तृतीयः परिच्छेदः ॥

अथ चतुर्थः परिच्छेदः ।

सन्धावचामज़ूपविशेषा बहुलम् ॥ १ ॥ उदुम्बरे दोर्लोपः ॥ २ ॥ कालायसे यस्य वा ॥ ३ ॥ भाजने जस्य ॥ ४ ॥ यावदादिषु वस्य ॥ ५ ॥ अन्त्यहलः ॥ ६ ॥ स्त्रियामात् ॥ ७ ॥ रो रा ॥ ८ ॥ न विद्युति ॥ ९ ॥ शरदो दः ॥ १० ॥ दिक्प्रावृषोः

अचामिति प्रत्याहारग्रहणम् अजिति च । सन्धौ वर्तमानानामचां स्थाने अज्विशेषा लोपविशेषाश्च बहुलं भवन्ति । अज्विशेषास्तावत्, जउणअडं जउणाअडं णइसोत्तो णईसोत्तो बहुमुहं बहूमुहं कण्णउरं कण्णऊरं सिरोवेअणा सिरवेअणा पीआपीअं पिआपिअं सीआसीअं सिआसिअं सवोमुओ सवोमूओ सरोरुहं सररुहं । लोपविशेषाः, राउलं राअउलं तुहद्धं तुहअद्धं महद्धं महअद्धं वावडणं वाअवडणं कुंभारो कुंभआरो पवणुद्धअं । संयोगपरे सर्वत्र पूर्वस्याचो लोपः क्व चिन्नित्यं क्व चिदन्यदेव बहुलग्रहणात् । तेनान्यदपि लाक्षणिककार्यं भवतिं ॥ १ ॥ उदुम्बरशब्दे दु इत्येतस्य लोपो भवति । उंबरं ॥२॥ कालायसशब्दे यस्य वा लोपो भवति । कालासं कालाअसं ॥३॥ भाजनशब्दे जकारयस्य लोपो वा भवति । भाणं भाअणं ॥ ४ ॥ यावदित्येवमादिषु वकारस्य वा लोपो भवति । जा जाव ता ताव पाराओ पारावओ अणुत्तन्त अणुवत्तन्त जीअं जीविअं एअं एव्वं एअ एव्व कुअलअं कुवलअं । यावत्, तावत्, पारावत, अनुवर्तमान, जीवित, एवम्, एव, कुवलय इत्येवमादयः ॥ ५ ॥ वेति निवृत्तम् । शब्दानां योऽन्त्यो हल् तस्य लोपो भवति । जसो णहं सरो कम्मो जाव ताव । यशः नभः सरः कर्म यावत् तावत् ॥ ६ ॥ स्त्रियां वर्त्तमानस्यान्त्यहल आकारो भवति । सरिआ पडिवआ वाआ सरित् प्रतिपद् वाक् ॥ ७ ॥ स्त्रियामन्त्यस्य हलो रेफस्य रा इत्ययमादेशो भवति । धुरा गिरा । ॥ ८ ॥ विद्युच्छब्दे आकारो न भवति विज्जू ॥ ९ ॥ शरच्छब्दस्यान्त्यहलो दो भवति । सरदो ॥१०॥ दिक्छब्दस्यान्त्यहलः प्रावृट्शब्द-

सः ॥ ११ ॥ मो बिन्दुः ॥ १२ ॥ अचि मश्च ॥१३॥ नञोर्हलि ॥ १४ ॥ वक्रादिषु ॥ १५ ॥ मांसादिषु वा ॥ १६ ॥ ययि तद्वर्गान्तः ॥ १७ ॥ नसान्तप्रावृट्शरदः पुंसि ॥ १८ ॥ न शिरोनभसी ॥ १९ ॥ पृष्ठाक्षिप्रश्नाः स्त्रियां वा ॥२०॥ ओदवापयोः ॥२१॥ तल्त्वयोर्दात्तणौ ॥ २२ ॥

स्यापि सकारो भवति । दिसा पाउसो ॥ ११ ॥ अन्त्यस्य हलो मकारस्य बिन्दुर्भवति । अच्छं वच्छं भद्दं अग्गिं दट्ठं वणं धणं ॥ १२ ॥ अचि परतो मो भवति वा । फलमवहरइ फलं अवहरइ ॥ १३ ॥ नकारञकारयोर्हलि परतो बिन्दुर्भवति मकारश्च । नस्य, अंसो अम्सो कंसो कम्सो । ञस्य, वंचणीअं वम्चणीअं विंझो विम्झो ॥ १४ ॥ वक्रादिषु शब्देषु बिन्दुरागमो भवति । वंकं तंसं हंसो अंसू मंसू गुंठी मंथं मणंसिणी दंसणं फंसो वण्णं पडिंसुदं अंसो अहिंमुको । वक्र, त्र्यस्र, ह्रस्व, अस्र, श्मश्रु, गृष्टि, मुस्त, मनस्विनी, दर्शन, स्पर्श, वर्ण, प्रतिश्रुत, अश्व, अभिमुक्त, इत्यादयः ॥१५॥ मांसादिषु शब्देषु वा बिन्दुः प्रयोक्तव्यः । मंसं मासं कहं कह णूणं णूण ताहिं ताहि असुं असु, तदयमपठितो मांसादिर्गणः यत्र क्व चिद् वृत्तभङ्गभयात् त्यज्यमानः क्रियमाणश्च बिन्दुर्भवति स मांसादिषु द्रष्टव्यः ॥ १६ ॥ ययि परतो बिन्दुस्तद्वर्गान्तो वा भवति । सङ्का सङ्खो अङ्को अङ्गं सञ्चरइ सण्ढो सन्तरइ सम्पत्ती । ययीति किम् । अंसो । वाधिकारात् पंकं विंदू संका संखो ॥ १७ ॥ नकारान्ताः सकारान्ताश्च प्रावृट्शरदौ च पुंसि प्रयोक्तव्याः । नान्ताः,कम्मो जम्मो वम्मो । सान्ताः,जसो तमो सरो पाउसो सरदो ॥ १८ ॥ शिरस् नभस् इत्येतौ न पुंसि प्रयोक्तव्यौ । सिरं णहं ॥ १९ ॥ एते स्त्रियां वा प्रयोक्तव्याः । पुट्ठी पुट्ठं अच्छी अच्छं अच्छं पण्हा पण्हो । पृष्ठम् अक्षि प्रश्नः ॥ २० ॥ अव अप इत्येतयोरुपसर्गयोर्वा ओत्वं भवति । ओहासो अवहासो ओसारिअं अवसारिअं अवहासः अपसारितम् । तल् त्व इत्येतयोः प्रत्यययोर्य-

तृण इरः शीले ॥ २४ ॥ आल्विल्लोल्लालवन्तेन्ता-
मतुपः ॥ २५ ॥ विद्युत्पीताभ्यां लः ॥ २६ ॥
वृन्दे वो रः ॥ २७ ॥ करेण्वां रणोः स्थितिपरि-
वृत्तिः ॥ २८ ॥ आलाने लनोः ॥ २९ ॥ बृह-

थासंख्यं दा त्तण इत्येतावादेशौ स्तः । पीणदा मूढदा पीणत्तणं मूढत्तणं ॥ २२ ॥ क्त्वाप्रत्ययस्य ऊण इत्ययमादेशो भवति । घेऊण सोऊण काऊण दाऊण । गृहीत्वा श्रुत्वा कृत्वा दत्त्वा ॥ २३ ॥ शीले यस्तृन् प्रत्ययो विहितस्तस्य इर इत्ययमादेशो भवति । भ्रमणशीलो भमिरो । हसनशीलो हसिरो ॥ २४ ॥ आलु इल्ल उल्ल आल वन्त इन्त इत्येतआदेशा मतुपः स्थाने भवन्ति । आलुस्तावत्,ईसालू णिद्दालू । इल्लः, विआरिल्लो मालाइल्लो । उल्लः,विआरुल्लो । आलः, धणालो सद्दालो । वन्तः, धणवन्तो जोव्वणवन्तो । इन्तः, रोसाइन्तो पाणाइन्तो । यथादर्शनमेते प्रयोक्तव्याः न सर्वे सर्वत्र । ईर्ष्यावत् निद्रावत् विकारवत् मालावत् धनवत् शब्दवत् यौवनवत् रोषवत् प्राणवत् । क्व चिदा मतुपोऽन्त्यस्य सन्तौ वा दृश्यते क्व चित् । हणुसा हणुमंतो ॥

इल्लोल्लावपरे प्रायः शैषिकेषु प्रयुञ्जते । पौरस्त्यं पुरोभवं पुरिल्लं । आत्मीयं अप्पुल्लं ॥ परिमाणे किमादिभ्यो भवन्ति केद्दहादयः ॥ केद्दहं केत्तिअं जेद्दहं जेत्तिअं तेद्दहं तेत्तिअं एद्दहं एत्तिअं ॥ क्वत्वसो हुत्तमित्यन्ये देशीशब्दः स दृष्यते ॥

सअहुत्तं सहस्सहुत्तं । जातौ वा स्वार्थिकः कः * ॥ जातौ स्वार्थे ककारः प्रयोक्तव्यः ॥ २५ ॥ विद्युत्पीतशब्दाभ्यां परतः स्वार्थे लप्रत्ययो भवति । विज्जू विज्जुली पीअं पीअलं ॥ २६ ॥ वृन्दशब्दे वकारात्परः स्वार्थे रेफो वा प्रयोक्तव्यः । व्रन्दं वंदं ॥ २७ ॥ करेणुशब्दे रेफणकारयोः स्थितिपरिवृत्तिर्भवति । कणेरू । पुंसि न भवति * । करेणू ॥ २८ ॥ आलानशब्दे लकारनकारयोर्हल्मात्रयोः स्थितिपरिवृत्तिर्भवति । आणालखंभो ॥ २९ ॥ बृहस्पतिशब्दे बकारहकारयोर्यथा-

ऽपतौ बहोर्भऔ ॥३०॥ मलिने लिनोरिलौ वा ॥३१॥
गृहे घरो ऽपतौ ॥ ३२ ॥ दाढादयो बहुलम् ॥ ३३ ॥

इति चतुर्थः परिच्छेदः ॥

अथ पञ्चमः परिच्छेदः ।

अत ओत् सोः ॥ १ ॥ जश्शसोर्लोपः ॥ २ ॥
अतो मः ॥ ३ ॥ टामोर्णः ॥ ४ ॥

संख्यं भकाराकारौ भवतः । भअप्फई ॥ ३० ॥ मलिनशब्दे लिकारनकारयोर्यथासंख्यमिकारलकारौ वा भवतः । मइलं मलिणं ॥ ३१ ॥ गृहशब्दे घर इत्ययमादेशो भवति । पतिशब्दे परतो न भवति । घरं भवने । अपताविति किम् । गहवई ॥ ३२ ॥ दाढा इत्येवमादयः शब्दा बहुलं निपात्यन्ते दंष्ट्रादिषु । दंष्ट्रा दाढा इदानीं एण्हि । दुहिता धीआ धूदा चातुर्यं चातुलिअं । मण्डूकः मण्डूरो गृहे निहितं घरे णिहितं उत्पलं कंदोट्ठो गोदावरी गोला ललाटं णिडालं भूः भुमआ वैदूर्य्यं वेलुरिअं उभयपार्श्वं अवहोवासं चूतः माइंदो माअंदो । आदिशब्दोयं प्रकारे तेन सर्व एव देशसंकेतप्रवृत्तभाषाशब्दाः परिगृहीताः ॥ ३३ ॥

इति प्राकृतप्रकाशे संकीर्णविधिर्नाम
चतुर्थः परिच्छेदः ॥

अकारान्ताच्छब्दात्परस्य सोः स्थाने ओत्वं भवति । वच्छो वसहो पुरिसो । वृक्षः वृषभः पुरुषः ॥ १ ॥ अत इत्यनुवर्तते । आकारान्तस्यानन्तरं यौ जश्शसौ तयोर्लोपो भवति । वच्छा सोहंति । वृक्षाः शोभन्ते । जश्शस्ङस्यांसु दीर्घ इति दीर्घे कृते पश्चाल्लोपो जसः । वच्छे णिअच्छह । वृक्षान्नियच्छत । ए च सुपीत्येत्वे कृते शसो लोपः ॥ २ ॥ अकारान्तस्यानन्तरं योऽम् द्वितीयैकवचनम् तदकारस्य लोपो भवति । वच्छं पेक्खई । मो विन्दुरिति विन्दुः ॥ ३ ॥ अतोनन्तरं टामोस्तृतीयैकवचनषष्ठीबहुवचनयोर्णकारो भवति । वच्छेण वच्छाण । ए च सुपीत्येत्वम् । जश्शस्ङस्यांसु दीर्घ इति दीर्घः ॥ ४ ॥

भिसो हिं ॥ ५ ॥ ङसेरादोदुहयः ॥ ६ ॥ भ्यसो हिंतो सुंतो ॥ ७ ॥ ङसो ङसः ॥ ८ ॥ ङेरेम्मी ॥ ९ ॥ सुपः सुः ॥ १० ॥ जश्शस्ङस्यांसु दीर्घः ॥ ११ ॥ ए च सुप्यङिङसोः ॥ १२ ॥ क्व चिद् ङसिङ्योर्लोपः ।१३। इदु तोः शसो णो ।१४। ङसो वा ॥१५॥ जसश्च ओ यूत्वम् ॥ १६ ॥

अतोनन्तरस्य भिसो हिं भवति । वच्छेहिं । ए च सुपीत्येत्वम् ॥ ५ ॥ अतोनन्तरस्य ङसेः पञ्चम्येकवचनस्य स्थाने आ, दो, दु, हि, इत्येत-आदेशा भवन्ति । वच्छा वच्छादो वच्छादु वच्छाहि । जश्शस्ङस्यांसु दीर्घत्वम् ॥ ६ ॥ अतोनन्तरस्य भ्यसो हिं तो सुंतो इत्येतावादेशौ भवतः । वच्छाहिंतो वच्छासुंतो । ए च सुपीति चकारेण दीर्घत्वम् ॥ ७ ॥ अतोनन्तरस्य ङसः स्स इत्यादेशो भवति । वच्छस्स ॥ ८ ॥ अतोनन्तरस्य ङेः ए म्मि इत्यादेशौ भवतः । वच्छे । क्व चिन्ङसिङ्योर्लोपः । वच्छम्मि ॥९॥ अतोनन्तरस्य सुपः सु इत्यादेशो भवति । वच्छेसु । ए च सुपीत्येत्वम् ॥ १० ॥ जसादिषु परतो ऽतो दीर्घो भवति । वच्छा सोहंति । जश्शसोर्लोप इति जसो लोपः । वच्छादो आगदो वच्छादु वच्छाहि ङसेरादोदुहयः । वच्छाण । टामोर्णः ॥ ११ ॥ अतोकारस्यैत्वं भवतिं सुपि परतो ङिङसौ वर्जयित्वा चकाराद्दीर्घश्च । वच्छे पेक्खह । जश्शसोर्लोपः । वच्छेण । टामोर्णः । वच्छेहिं बच्छेसु चकाराद्दीर्घश्चेति । वच्छाहितो वच्छासुंतो भ्यसो हिंतो सुंतो । अङिङसोरिति किम् । वच्छम्मि वच्छस्स ॥१२॥ अतो ङसि ङि इत्येतयोः परतः क्व चिल्लोपो भवति । वच्छा आगदो । ङसेरादोदुहय इति आ । वच्छेठिअं ङेरेम्मी इत्येत्वम् ॥१३॥ इदुदन्तयोः शसो णो भवति । अग्गिणो पेक्खह । बाउणो पेक्ख ॥ १४ ॥ इदुदन्तयोर्ङसो वा णो भवति । अग्गिणो अग्गिस्स वाउणो वाउस्स अग्नेः वायोः॥१५॥इदुदन्तयोर्जस ओकारादेशो भवति इदुतोश्च ईऊत्वं वा चकाराद् णो च । अग्गीओ वाऊओ । अग्गिणो वाउणो ॥ १६ ॥

टा णा ॥ १७ ॥ सुभिस्सुप्सु दीर्घः ॥ १८ ॥
स्त्रियां शस उदोतौ ॥ १९ ॥ जसो वा ॥ २० ॥
अमि ह्रस्वः ॥ २१ ॥ टाङसङीनामिदेददातः ॥२२॥
नातोऽदातौ ॥ २३ ॥ आदीतौ बहुलम् ॥ २४ ॥
न नपुंसके ॥ २५ ॥ इज्जश्शसोर्दीर्घश्च ॥ २६ ॥
नामन्त्रणे सावोत्वदीर्घबिन्दवः ॥ २७ ॥

इदुदन्तयोष्टाविभक्तेः णा इत्ययमादेशो भवति । अग्गिणा वाउणा ॥ १७ ॥ इदुदन्तयोः सु भिस् सुप् इत्येतेषु दीर्घो भवति । सु, अग्गी वाऊ । भिस्,अग्गीहिं वाऊहिं। सुप्,अग्गीसु वाऊसु ॥१८॥ स्त्रियां वर्तमानस्य शस उत् ओत् इत्येतावादेशौ भवतः । मालाउ मालाओ णईउ णईओ । बहूउ बहूओ ॥१९॥ जसः स्त्रियाम् उत् ओत् इत्येतावादेशौ वा भवतः । पक्षे अदन्तवत् । मालाउ मालाओ । माला ॥ २० ॥ अमि परतः स्त्रियां ह्रस्वो भवति । मालं णइं बहुं ॥ २१ ॥ टा, ङस्, ङि, इत्येतेषां स्त्रियाम् इत् एत् अत् आत् इत्येतआदेशा भवन्ति । टा, णईइ णईए णईअ णईआ कअं । ङस्, णईइ णईए णईअ णईआ वणं । ङि, णईइ णईए णईअ णईआ ठिअं ॥ २२ ॥ आत आकारान्तस्य स्त्रीलिङ्गस्यानन्तरं टाङसङीनाम् अत्,आत्,इत्येतावादेशौ न भवतः । पूर्वेण प्राप्तो, निषिध्यते । मालाइ मालाए कअं धणं ठिअं ॥ २३ ॥ स्त्रियामाकारान्तादातः स्थाने आत् ईत् इत्येतौ बहुलं प्रयोक्तव्यौ । सहमाणा सहमाणी हलद्दा हलद्दी सुप्पणहा सुप्पणही छाहा छाही ॥ २४ ॥ प्रथमैकवचने नपुंसके दीर्घत्वं न भवति । सौ दीर्घः पूर्वस्येत्यनेन इदुदन्तयोः प्राप्तं पूर्वस्य दीर्घत्वं न नपुंसके इत्येनन बाध्यते । दहिं महुं हविं । दधि मधु हविः ॥ २५ ॥ नपुंसके वर्तमानयोर्जश्शसोः स्थानइदादेशो भवति पूर्वस्य च दीर्घः वणाइ दहीइ । महूइ ॥ २६ ॥ आमन्त्रणे गम्यमाने सौ परत ओत्वदीर्घबिन्दवो न भवन्ति । अत ओत् सोरित्योत्वं प्राप्तम् । सुभिस्सुप्सु दीर्घ इति दीर्घः । सोर्बिन्दुर्नपुंसकइति बिन्दुः प्राप्तः । हे वच्छ हे अग्गि हे वाउ हे वण हे दहि हे महु ॥ २७ ॥

स्त्रियामात एत् ॥ २८ ॥ ईदूतोर्ह्रस्वः ॥ २९ ॥ सोर्बिन्दुर्नपुंसके ॥ ३० ॥ ऋत आरः सुपि ॥३१॥ मातुरात् ॥ ३२ ॥ उर्ज्जश्शस्टाङस्सुप्सु वा ॥३३॥ पितृभ्रातृजामातृणामरः ॥ ३४ ॥ आ च सौ॥३५॥ राज्ञश्च।३६। आमन्त्रणे वा बिन्दुः।३७। जश्शस्ङसां णो ॥ ३८ ॥ शस एत् ॥ ३९ ॥ आमो णं ॥ ४० ॥ टा णा ॥ ४१ ॥

स्त्रियामामन्त्रणे आतः स्थाने एत्वं भवति सौ परतः। हे माले हे साले। अन्त्यस्य हल इति सोर्लोपः ॥ २८ ॥ आमन्त्रणे ईदूतोर्ह्रस्वो भवति। हे णई हे वहु ॥ २९ ॥ नपुंसके वर्तमानस्य सोर्बिन्दुर्भवति। वणं दहिं महुं ॥ ३० ॥ ऋकारान्तस्य सुपि परत आर इत्यादेशो भवति। भत्तारो सोहइ भत्तारं पेक्खसु भत्तारेण कअं ॥ ३१ ॥ मातृसम्बन्धिन ऋकारस्याकारो भवति। माआ सोहइ माअं पेक्खसु माआइ कअं माआए ॥ ३२ ॥ जश्शस्टाङस्सुप्सु परत ऋकारस्य स्थाने उकारादेशो भवति वा। जस्,भत्तुणो भत्तारा। शस्,भत्तुणो भत्तारे। टा,भत्तुणा भत्तारेण। ङस्,भत्तुणो भत्तारस्स। सुप्। भत्तूसु भत्तारेसु। आरादिः पूर्ववत् ॥३३॥ पित्रादीनां सुपि परत ऋतो ऽरो भवति। आरापवादः। पिअरं पिअरेण भाअरं भाअरेण जामाअरं जामाअरेण ॥३४॥ पित्रादीनामाकारो भवति सौ परतः चकारादरश्च। पिआ पिअरो भाआ भाअरो जामाआ जामाअरो॥३५॥राजन्शब्दस्य आ इत्ययमादेशो भवति सौ परतः। राआ ॥ ३६ ॥ राजन्शब्दस्य आमन्त्रणे वा बिन्दुः स्यात्। हेराअं हेराअ ॥ ३७ ॥ राज्ञ उत्तरेषां जस् शस् ङस् इत्येतेषां णो इत्ययमादेशो भवति। राआणो पेक्खंति राआणो पेक्ख राइणो धणं रण्णो धणं ॥ ३८ ॥ राज्ञः परस्य शस ए इत्ययमादेशो भवति। राए पेक्ख राआणो पेक्ख ॥ ३९ ॥ राज्ञ उत्तरस्यामः षष्ठीबहुवचनस्य णं इत्ययमादेशो भवति। राआणं ॥ ४० ॥ राज्ञ उत्तरस्याः टाविभक्तेः णा इत्ययमादेशः स्यात्। राइणा ॥ ४१ ॥

ङसश्च द्वित्वं वान्त्यलोपश्च ॥ ४२ ॥ इदद्वित्वे ॥४३॥ आ णोणमोरङसि ॥ ४४ ॥ आत्मनो ऽप्पाणो वा ॥ ॥ ४५ ॥ इत्वद्वित्ववर्जं राजवदनादेशे ॥४६॥ ब्रह्माद्या आत्मवत् ॥ ४७ ॥

राज्ञ उत्तरस्य ङसादेशस्य टादेशस्य च वा विकल्पेन द्वित्वं भवति । अन्त्यस्य च लोपः । रण्णो राइणो धणं राइणा रण्णा कअं ॥४२॥ वेति निवृत्तम् । ङसादेशस्य टादेशस्य च अकृते द्वित्वे राज्ञ इत्वं भवति । राइणो राइणा । कृते द्वित्वे त्वित्वं न भवति । रण्णा रण्णो ॥ ४३ ॥ णोणमोः परयो राज्ञो जकारस्य आकारादेशः स्यात् । अङसि षष्ठ्येकवचने न भवति । राआणो पेक्खंति । राआणो पेक्ख । राआणं धणं । अङसीति किम् । राइणो रण्णो धणं । शेषमदन्तवत् । राअं राएहिं राआ राआदो राआदु राआहिंतो राआसुंतो राअम्मि राए राएसु । राजानं राजभिः राज्ञः राजभ्यः राज्ञि राजसु ॥ ४४ ॥ आत्मनो ऽप्पाण इत्यादेशो भवति वा । अप्पा अप्पाणो ॥ ४५ ॥ आत्मनो ऽनादेशे राजवत्कार्यंस्यादित्वद्वित्वे वर्जयित्वा । अप्पा अप्पाणो अप्पणा अप्पणो । आत्मा आत्मानः आत्मना आत्मनः ॥ ४६ ॥ ब्रह्माद्याः शब्दा लक्ष्यानुसारेणात्मवत् साधवो भवन्ति । बह्मा बह्माणो जुवा जुवाणो अद्धा अद्धाणो । ब्रह्मन्, युवन्, अध्वन् , एवमादयो लक्ष्यानुसारेणावगन्तव्याः ॥ ४७ ॥

इति प्राकृतप्रकाशे लिङ्गविभक्त्यादेशः
पञ्चमः परिच्छेदः ॥

अथ षष्ठः परिच्छेदः ।

सर्वादेर्जस एत्वम् ॥ १ ॥ ङेः स्सिंम्मित्थाः ॥ २ ॥ इदमेतत्किंयत्तद्भ्यष्टा इणा वा ॥ ३ ॥ आम एसिं ॥ ४ ॥ किंयत्तद्भ्यो ङस आसः ॥ ५ ॥ इद्भ्यः स्सा से ॥ ६ ॥ ङेर्हिं ॥ ७ ॥ आहे इआ काले ॥ ८ ॥ त्तो दो ङसेः ॥ ९ ॥ तदओश्च ॥ १० ॥

सर्वादेरुत्तरस्य जस एत्वं भवति। सब्बे जे ते के कदरे । सर्वे ये ते के कतरे ॥ १ ॥ ङेः सप्तम्येकवचनस्य सर्वादिपरस्थितस्य स्थाने स्सिं म्मि त्थ इत्येतआदेशा भवन्ति । सव्वस्सिं सव्वम्मि सव्वत्थ इअरस्सिं इअरम्मि इअरत्थ । सर्वस्मिन् इतरस्मिन् ॥ २ ॥ इदम् एतद् किम् यद् तद् इत्येतेभ्यः टा इत्यस्य इणादेशो भवति वा । इमिणा एदिणा किणा जिणा तिणा । पक्षे इमेण एदेण केण जेण तेण । अनेन एतेन केन येन तेन ॥ ३ ॥ इदमादिभ्य उत्तरस्य आम एसिं इत्ययमादेशो वा भवति । इमेसिं इमाण एदेसिं एदाण केसिं काण जेसिं जाण तेसिं ताण ॥ ४ ॥ किम् यद्, तद्, एभ्य उत्तरस्य ङस आस इत्ययमादेशो भवति वा । कास कस्स जास जस्स तास तस्स ॥ ५ ॥ इकारान्तेभ्यः किमादिभ्य उत्तरस्य ङसः स्सा से इत्येतावादेशौ भवतः । किस्सा किसे कीआ कीए कीअ कीइ जिस्सा जीसे जीआ जीए जीअ जीइ तिस्सा तीसे तीआ तीए तीअ तीइ ॥६॥ किमादिभ्य उत्तरस्य ङेः हिं इत्ययमादेशो भवति वा । कहिं कस्सिं कम्मि कत्थ जहिं जस्सिं जम्मि जत्थ तहिं तस्सिं तम्मि तत्थ ॥ ७ ॥ किंयत्तद्भ्यो ङेः काले आहे इआ इत्यादेशौ वा भवतः । काहे जाहे ताहे कइआ जइआ। तइआ काहिं इत्यादयो ऽपि। कदा यदा तदा ॥८॥ किंयतद्भ्यो ङसेः त्तो दो इत्येतावादेशौ भवतः । कत्तो कदो जत्तो जदो तत्तो तदो ॥ ९ ॥ तद उत्तरस्य ङसेरोकारादेशो भवति वा । तो तत्तो तदो तासिं ॥ १० ॥

ङसा से ॥ ११ ॥ आमा सिं ॥ १२ किमः कः ॥१३॥ इदम इमः ॥ १४ ॥ स्सास्सिमोरद्वा ॥ १५ ॥ ङेर्देन हः ॥ १६ ॥ न त्थः ॥ १७ ॥ नपुंसके स्वमोरिदमिणमिणमो ॥ १८ ॥ एतदः सावोत्वं वा ॥ १९ ॥ त्तो ङसेः ॥ २० ॥ त्तोत्थयोस्तलोपः ॥ २१॥ तदेतदोः सः सावनपुंसके ॥२२॥ अदसो दो मुः ॥ २३ ॥

वेति वर्तते । तदो ङसा सह से इत्ययमादेशो भवति पक्षे यथाप्राप्तम् । से तास तस्स ॥ ११ ॥ तद् आमा सह सिं इत्ययमादेशो वा भवति । सिंः ताण तेषाम् तासाम् ॥ १२ ॥ किंशब्दस्य सुपि परतः क इत्ययमादेशो भवति । को के केण केहिं ॥ १३ ॥ सुपि परत इदम इम इत्ययमादेशो भवति । इमो इमे इमं इमेण इमेहिं ॥ १४ ॥ स्सास्सिमोः परत इदसो ऽदादेशो वा भवति । अस्स इमस्स अस्सिं इमस्सिं ॥ १५ ॥ इदमो दकारेण सह ङेः स्थाने हकारादेशो वा भवति । इह पक्षे अस्सिं इमस्सिं इमम्मि ॥ १६ ॥ इदमः परस्य ङेः त्थ इत्ययमादेशो न भवति । ङेः स्सिंस्मित्था इति प्राप्ते प्रतिषिध्यते । इह अस्सिं इमस्सिं इमम्मि ॥ १७ ॥ नपुंसकलिङ्गे इदमः स्वमोः परतः सविभक्तिकस्य इदं इणं इणमो इत्येते त्रय आदेशा भवन्ति । इदं इणं इणमो धणं ॥ १८ ॥ एतच्छब्दस्य सौ परतः ओत्वं वा भवति । नित्ये प्राप्ते विकल्प्यते । एस एसो । एषः॥१९॥ एतदः परस्य ङसेः त्तो इत्ययमादेशो भवति । एत्तो एदादो एदादु एदाहि । एतस्मात् ॥२०॥ एतदस्तकारस्य त्तोत्थयोः परतो लोपो भवति । एत्तो एत्थ ॥ २१ ॥ तच्छब्दस्य एतच्छब्दस्य यस्तकारस्तस्य सकारादेशो भवति अनपुंसके सौ परतः । सो पुरिसो सा महिला एस एसो एसा । साविति किम्। एदे ते एदं तं । अनपुंसक इति किम् । तं एदं धणं ॥ २२ ॥ अदसो दकारस्य सुपि परतो मु इत्ययमादेशो भवति । अमू पुरिसो अमू महिला अमूओ पुरिसा अमूओ महिलाओ अमुं वणं अमूइं वणाइं ॥ २३ ॥

हश्च सौ ॥ २४ ॥ पदस्य ॥ २५ ॥ युष्मदस्तं तुमं ॥ २६ ॥ तुं चामि ॥ २७ ॥ तुज्झे तुह्मे जसि ॥ २८ ॥ वो च शसि ॥ २९ ॥ टाङ्योस्तइ तए तुमए तुमे ॥ ३० ॥ ङसि तुमोतुहतुज्झतुह्मतुम्माः ॥ ३१ ॥ आङि च ते दे ॥ ३२ ॥ तुमाइ च ॥ ३३ ॥ तुज्झेहिं तुह्मेहिं तुम्मेहिं भिसि ॥ ३४ ॥ ङसौ तत्तो तइत्तो तुमादो तुमादु

अदसो दकारस्य सौ परतो हकारादेशो भवति। अह पुरिसो अह महिला अह वणं। हादेशो ऽयमोत्वात्वविन्दून् त्रिष्वपि लिङ्गेषु परत्वाद् बाधते ॥ २४ ॥ अधिकारो ऽयम् आशब्दविधानात्। यदित ऊर्ध्वमनुक्रमिष्यामः पदस्य तद्भवतीत्येवं वेदितव्यम्। तच्च तत्रैवोदाहरिष्यामः ॥ २५ ॥ सावित्येव। युष्मदः पदस्य सौ परतः तं तुमं इत्येतावादेशौ भवतः। तं आगदो तुमं आगदो ॥ २६ ॥ युष्मदः पदस्य आमि परतः तुं इत्यादेशो वा भवति तुमं च। तुं पेक्खामि तुमं पेक्खामि ॥२७॥ युष्मदः पदस्य जसि परतः तुज्झे तुह्मे इत्येतावादेशौ भवतः। तुज्झे आगदा तुह्मे आगदा ॥ २८ ॥ शसि युष्मदः पदस्य वो इत्यादेशो भवति चकारात् तुज्झे तुह्मे च। वो पेक्खामि तुज्झे तुह्मे पेक्खामि ॥ २९ ॥ युष्मदुत्तरयोः टा ङि इत्येतयोः तइ तए तुमए तुमे इत्येतआदेशा भवन्ति। टा, तइ तए तुमए तुमे कअं। ङि, तइ तए तुमए तुमे ठिअं ॥ ३० ॥ युष्मदः पदस्य ङसि तुमो तुह तुज्झ तुह्म तुम्म इत्येतआदेशा भवन्ति। तुमो पदं तुह तुज्झ तुह्म तुम्म पदं ॥ ३१ ॥ आङि तृतीयैकवचने चकाराद् ङसि च परतो युष्मदः पदस्य ते दे इत्येतावादेशौ भवतः। ते कअं दे कअं ते धणं ॥ ३२ ॥ आङि युष्मदः पदस्य तुमाइ इत्ययमादेशो भवति तुमाइ कअं ॥ ३३ ॥ भिसि परतो युष्मदः पदस्य तुज्झेहिं तुह्मेहिं तुम्मेहिं इत्येतआदेशा भवन्ति। तुज्झेहिं तुह्मेहिं तुम्मेहिं कअं ॥ ३४ ॥ ङसौ परतो युष्मदः पदस्य तत्तो तइत्तो तुमादो तुमादु तुमाहि इत्येतआदेशा भवन्ति। तत्तो आगदो तइत्तो तुमादो तुमादु तुमाहि आ-

तुमाहि ॥ ३५ ॥ तुह्माहिंतो तुह्मासुंतो भ्यसि ॥३६॥ वो मे तुज्झाणं तुह्माणमामि ॥ ३७ ॥ ङौ तुमम्मि ॥ ३८ ॥ तुज्झेसु तुम्हेसु सुपि ॥ ३९ ॥ अस्मदो ह-महमहअं सौ ॥ ४० ॥ अहम्मिरमि च ॥ ४१ ॥ मं ममं ॥ ४२ ॥ अह्मे जश्शसोः ॥ ४३ ॥ णो श-सि ॥ ४४ ॥ आङि मे ममाइ ॥ ४५ ॥ ङौ च मइ मए ॥ ४६ ॥ अह्मेहिं भिसि ॥ ४७ ॥ मत्तो मइत्तो ममादो ममादु ममाहि ङसौ ॥ ४८ ॥

गदो त्वदागतः।३५।युष्मदः पदस्य पञ्चमी बहुवचने भ्यसि तुह्माहिंतो तुह्मासुंतो इत्येतावादेशौ भवतः । तुह्माहिंतो तुह्मासुंतो आगदो ॥३६॥ आमि परतो युष्मदः पदस्य वो मे तुज्झाणं तुह्माणं इत्येतआदेशा भवन्ति । वो धणं मे धणं तुज्झाणं तुह्माणं धणं ॥ ३७ ॥ युष्मदः प-दस्य ङौ परतः तुमम्मि इत्यादेशो भवति । तुमम्मि ठिअं । पूर्वोक्ता-श्च * । तइप्रभृतयश्चत्वारो ऽप्यादेशा भवन्ति ॥ ३८ ॥ युष्मदः पद-स्य सप्तमीबहुवचने तुज्झेसु तुह्मेसु इत्येतावादेशौ भवतः । तुज्झेसु ठिअं तुह्मेसु ठिअं ॥ ३९ ॥ अस्मदः पदस्य सौ परतो हं अहं अहअं इत्येतआदेशा भवन्ति । हं अहं अहअं करेमि ॥ ४० ॥ अमि परतो ऽस्मदः पदस्य अहम्मि इत्ययमादेशो भवति सौ च । अहम्मि पेक्ख अहम्मि करेमि । मां प्रेक्षस्व अहं करोमि ॥ ४१ ॥ अमीति वर्तते । अस्मदः पदस्य अमिं परतो मं ममं इत्येतावादेशौ भवतः । मं ममं पेक्ख ॥ ४२ ॥ अस्मदः पदस्य जश्शसोः परतः अह्मे इत्ययमादेशो भवति । अह्मे आगदा अह्मे पेक्ख॥४३॥अस्मदः पदस्य शसि परतो णो इत्ययमादेशो भघति । णो पेक्ख । अस्मान् प्रेक्षस्व।४४।अस्मदः पदस्य आङि परतो मे ममाइ इत्येतावादेशौ भवतः । मे कअं ममाइ कअं।४५। अस्मदः पदस्य ङौ परतो मइ मए इत्येतावादेशौ भवतः । चकारात्तृ-तीयैकवचने च । मइ मए ठिअं मइ मए कअं॥४६॥अस्मदः पदस्य भिसि अह्मेहिं इत्ययमादेशो भवति। अह्मेहिं कअं।४७।अस्मदःपदस्य ङसौ पर-त एते आदेशा भवन्ति।मत्तो गदो। मइत्तो ममादो ममादु ममाहि गदो।

अह्माहिंतो अह्मासुंतो भ्यसि ॥ ४९ ॥ मे मम मह मज्झ ङसि ॥ ५० ॥ मज्झणो अह्म अह्माणमह्मे आमि ॥ ५१ ॥ ममम्मि ङौ ॥ ५२ ॥ अह्मेसु सुपि ॥ ५३ ॥ द्वेर्दो ॥ ५४ ॥ त्रेस्ति ॥ ५५ ॥ तिण्णि जश्शस्भ्याम् ॥ ५६ ॥ द्वेर्दुवे दोणि वा ॥ ५७ ॥ चतुरश्चत्तारो चत्तारि ॥ ५८ ॥ एषामामो ण्हं ॥ ५९ ॥ शेषो

अस्मदः पदस्य भ्यसि परतो अह्माहिंतो अह्मासुंतो इत्येतावादेशौ भवतः । अह्माहिंतो अह्मासुंतो गदो ॥ ४९ ॥ अस्मदः पदस्य ङसि परत एतआदेशा भवन्ति । मे धणं मम मह मज्झ धणं ॥ ५१ ॥ अस्मदः पदस्य आमि परत एतआदेशा भवन्ति । मज्झणो अह्म अह्माणं अह्मे धणं । अस्माकं धनम् ॥ ५१ ॥ अस्मदः पदस्य ङौ परतो ममम्मि इत्यादेशो भवति । ममम्मि ठिअं । पूर्वोक्तौ मइ मए इत्येतौ च ॥ ५२ ॥ अस्मदः पदस्य सप्तमी बहुवचने सुपि परतः अह्मेसु इत्ययमादेशो भवति । अह्मेसु ठिअं ॥ ५३ ॥ पदस्येति निवृत्तम् । सुपीति वर्तते द्विशब्दस्य दो इत्ययमादेशो भवति सुपि परतः । दोहिं दोसु द्वाभ्याम् द्वयोः ॥ ५४ ॥ त्रिशब्दस्य सुपि परतः ति इत्यादेशो भवति । तीहिं तीसु त्रिभिः त्रिषु ॥ ५५ ॥ त्रिशब्दस्य जश्शस्भ्यां सह तिण्णि इत्यादेशो भवति । तिण्णि आगदा तिण्णि पेक्ख । त्रय आगताः त्रीन् प्रेक्षस्व ॥ ५६ ॥ द्विशब्दस्य जस्शस्भ्यां सह दुवे दोणि इत्येतावादेशौ भवतः । दुवे कुणंति दोणि कुणंति पक्षे दो कुणंति । द्वौ कुरुतः । दुवे पेक्ख दोणि पेक्ख । पक्षे दो पेक्ख । द्वौ प्रेक्षस्व ॥ ५७ ॥ चतुश्शब्दस्य जश्शस्भ्यां सह चत्तारो चत्तारि इत्येतावादेशौ भवतः । चत्तारो चत्तारि पुरिसा कुणंति । चत्तारो चत्तारि पुरिसे पेक्ख ॥ ५८ ॥ एषां द्वित्रिचतुःशब्दानामामः स्थाने ण्हं इत्ययमादेशो भवति । दोण्हं धणं तिण्हं धणं चतुण्हं धणं ॥ ५९ ॥ शेषः सुब्विधिरदन्तवद्भवति । अकारान्तादु भिसो हिं इत्ययमादेश

ऽ दन्तवत् ॥ ६० ॥ न ङिङस्योरेदातौ ॥ ६१ ॥ ए भ्यसि ॥ ६२ ॥ द्विवचनस्य बहुवचनम् ॥६३॥ चतुर्थ्याः षष्ठी ॥ ६४ ॥

इति षष्ठः परिच्छेदः ॥

अथ सप्तमः परिच्छेदः ।

ततिपोरिदेतौ ॥ १ ॥ थास्सिपोः सि से ॥ २ ॥ इडूमिपोर्मिः ॥ ३ ॥ न्तिहेत्थामोमुमा

उक्त इकारोकारान्तादपि भवति। अग्गीहिं वाऊहिं एवं मालाहिं णईहिं बहूहिं अग्गिस्स वाउस्स अग्गीदो वाऊदो अग्गीसु वाऊसु । एवं दोहिं तीहिं चऊहिं ॥ ६० ॥ इकारोकारान्तानां ङिङस्योरदन्तवद् एकाराकारौ न भवतः । अग्गिम्मि वाउम्मि अग्गीदो वाऊदो अग्गीदु वाऊदु अग्गीहि वाऊहि ॥ ६१ ॥ नेत्यनुवर्तते भ्यसि परत इकारोकारान्तयोरदन्तवदेत्वं न भवति । अग्गीहिंतो वाऊहिंतो अग्गीसुंतो वाऊसुंतो ॥ ६२ ॥ सर्वासां विभक्तीनां सुपां तिङां च द्विवचनस्य बहुवचनं प्रयोक्तव्यम् । वृक्षौ वच्छा वृच्छाभ्याम् वच्छेहिं वच्छाहिंतो वृक्षयोः वच्छाण वच्छेसु । तिङां यथा, तिष्ठतः चिट्ठंति ॥ ६३ ॥ चतुर्थीविभक्तेः स्थाने षष्ठीविभक्तिर्भवति । बह्मणस्स देहि बह्मणाणं देहि । ब्राह्मणाय देहि ब्राह्मणेभ्यो देहि ॥ ६४ ॥

इति प्राकृतप्रकाशे सर्वनामपरिच्छेदः षष्ठः ॥

त तिप् इत्येतयोरेकस्य स्थाने इत् एत् इत्येतावादेशौ भवतः । पढइ पढए सहइ सहए । पठति पठत सहति सहते ॥ १ ॥ थास् सिप् इत्येतयोरेकैकस्य स्थाने सि से इत्येतावादेशौ भवतः । पढसि पढसे सहसि सहसे॥२॥इट् मिप् इत्येतयोः स्थाने मिर्भवति । पढामि हसामि सहामि ॥ ३ ॥ बहुषु वर्तमानानां तिङां स्थाने न्ति ह इत्था मो मु म

बहुषु ॥ ४ ॥ अत ए से ॥ ५ ॥ अस्तेर्लोपः ॥ ६ ॥ मिमोमुमानामधो हश्च ॥ ७ ॥ यक ईअइज्जौ ॥ ८ ॥ नान्त्यद्वित्वे ॥ ९ ॥ न्तमाणौ शतृशानचोः ॥ १० ॥ ई च स्त्रियाम् ॥ ११ ॥ धातोर्भविष्यति हिः ॥ १२ ॥ उत्तमे स्सा हा च ॥ १३ ॥

इत्येतआदेशा भवन्ति । प्रथमपुरुषस्य, रमंति पढंति हसंति । मध्यमस्य, रमह पढह हसह पढित्था । उत्तमस्य पढामो पढमु पढम ॥ ४ ॥ नित्यार्थं वचनं यतो विशेषणम् ततिपोः सिप्थासोर ए से इत्यादेशावत एव परौ भवतो नान्यस्मात् । ततिपोः,रमए पढए। सिप्थासोः,रमसे पढसे। अत इति किम् । होइ भवति॥५॥अस्तेर्धातोः थास्सिपोरादेशयोः परतो लोपो भवति । सुत्तो सि पुरिसो सि । सुप्तो ऽसि पुरुषो ऽसि ॥ ६ ॥ मिमोमुमानामस्तेः परेषामधो हकारः प्रयोक्तव्यः । अस्तेश्च लोपः । गओ ह्मि गअ ह्मो गअ ह्मु गअ ह्म । गतो ऽस्मि गताः स्मः॥७॥ यकः स्थाने ईअ-इज्ज इत्यादेशौ भवतः । पढीअइ । पढिज्जइ सहीअइ सहिज्जइ । पठ्यते सह्यते ॥ ८ ॥ धातोरन्त्यद्वित्वे सति यक ईअ इज्ज इत्यादेशौन भवतः । हस्सइ गम्मइ । हस्यते गम्यते । गमादीनां विकल्पेन द्वित्वविधाने उक्तावादेशौ न भवतः द्वित्वाविधाने तु भवत एव। गमीअइ गमिज्जइ ॥ ९ ॥ शतृ शानच् इत्येतयोरेकैकस्य न्त माण इत्येतावादेशौ भवतः । पढंतो पढमाणो हसंतो हसमाणो ॥ १० ॥ स्त्रियां वर्तमानयोः शतृशानचोरीकारादेशो भवति न्तमाणौ च । हस ई हसन्ती हसमाणा वेवई वेवंती वेवमाणा ॥ ११ ॥ भविष्यति काले धातोः परो हिशब्दः प्रयोक्तव्यः । होहिइ हसिहिइ होहिंति हसिहिंति। भविष्यति हसिष्यति भविष्यन्ति हसिष्यन्ति ॥ १२ ॥ भविष्यत्युत्तमे स्सा हा इत्येतौ प्रयोक्तव्यौ चकाराद् हिश्च । होस्सामि होहामि होहिमि होस्सामो होहामो होहिमो इत्यादि । भविष्यामि भविष्यामः॥ १३ ॥

मिना स्सं वा ॥ १४ ॥ मोमुमैर्हिस्सा हित्था ॥१५॥ कृदाश्रुवचिगमिरुदिदृशविदिरूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं वेच्छं ॥ १६ ॥ श्र्वादीनां त्रिष्वप्यनुस्वारवर्जं हिलोपश्च वा ॥ १७ ॥ उसुमु विध्यादिष्वेकस्मिन् ॥ १८ ॥ न्तुहमो बहुषु ॥ १९ ॥ वर्तमानभविष्यदनद्यतनयोर्ज्ज ज्जा

भविष्यत्युत्तमे मिना सह धातोः परः स्संशब्दः प्रयोक्तव्यो वा । होस्सं । पक्षे होस्सामि होहामि होहिमि ॥ १४ ॥ भविष्यति कालउत्तमे बहुवचनादेशस्य मो मु म इत्येतैः सह हिस्सा हित्था इत्येतावादेशौ वा भवतः। होहिस्सा होहित्था हमिहिस्सा हसिहित्था। भविष्यामः हसिष्यामः। पक्षे होहिमो होस्सामो होहामो हसिहिमो हसिस्सामो हसिहामो । एवं मुमयोरपि इत्यादि ॥ १५ ॥ भविष्यति कालउत्तमैकवचने कृञादीनां स्थाने यथासंख्यं काहंप्रभृतय आदेशा भवन्ति। काहं करिष्यामि दाहं दास्यामि सोच्छं श्रोष्यामि वोच्छं वक्ष्यामि गच्छं गमिष्यामि रोच्छं रोदिष्यामि दच्छं द्रक्ष्यामि वेच्छं वेत्स्यामि इत्यादि ॥ १६ ॥ श्रु इत्येवमादीनां प्रथममध्यमोत्तमेषु त्रिष्वपि पुरुषेषु परतो भविष्यति काले सोच्छं इत्यादय आदेशा भवन्ति । अनुस्वारं विहाय हिलोपश्च वा । सोच्छिइ सोच्छिहिइ श्रोष्यति सोच्छिन्ति सोच्छिहिंति श्रोष्यन्ति सोच्छिसि सोच्छिहिसि श्रोष्यसि सोच्छित्था सोच्छिहित्था । श्रोष्यथ । सोच्छिमि सोच्छामि सोच्छिहिमि श्रोष्यामि सोच्छिमो सोच्छिहिमो सोच्छिमु सोच्छिहिमु सोच्छिम सोच्छिहिम सोच्छिस्सामो सोच्छिस्सामु सोच्छिस्साम । श्रोष्यामः । एवं वोच्छादिरपि ॥ १७ ॥ विध्यादिष्वेकस्मिन्नुत्पन्नस्य प्रत्ययस्य यथासंख्यम् उ सु मु इत्येतआदेशा भवन्ति । हसउ हससु हसमु । हसतु हस हसानि ॥ १८ ॥ विध्यादिषु बहुषूत्पन्नस्य प्रत्ययस्य यथासंख्यं न्तु ह मो इत्येतआदेशा भवन्ति । हसंतु हसह हसामो ॥ १९ ॥ वर्तमाने भविष्यदनद्यतने विध्यादिषु चोत्पन्नस्य प्रत्ययस्य ज्ज ज्जा इत्येतावादेशौ वा भवतः । पक्षे यथाप्राप्तम् । वर्तमाने तावत्,

वा ॥ २० ॥ मध्ये च ॥ २१ ॥ नानेकाचः ॥२२॥ ईअ भूते ॥ २३ ॥ एकाचो हीअ ॥ २४ ॥ अस्तेरासिः ॥ २५ ॥ णिच एदादेरत आत् ॥ २६ ॥ आवे च ॥ २७ ॥ आविः क्तकर्मभावेषु वा ॥२८॥ नैदावे ॥ २९ ॥ अत आ मिपि वा ॥ ३० ॥

होज्ज होज्जा हसेज्ज हसेज्जा । पक्षे होइ हसइ । भविष्यदनद्यतने, होज्ज होज्जा । पक्षे होहिइ इत्यादि । विध्यादिष्वेवम् ॥ २० ॥ वर्तमानभविष्यदनद्यतनयोर्विध्यादिषु च धातुप्रत्यययोर्मध्ये ज्ज ज्जा इत्येतावादेशौ वा भवतः । वर्तमाने, होज्जइ होज्जाइ । पक्षे यथाप्राप्तम् । विध्यादिषु होज्जउ होज्जाउ भवेदित्यादि ॥ २१ ॥ वर्तमानभविष्यदनद्यतनयोर्विध्यादिषु चानेकाचो धातोः प्रत्यये परे मध्ये ज्ज ज्जा इत्येतावादेशौ न भवतः किन्त्वन्त एव भवतः । सहइ तुवरइ । अन्ते यथा, हसेज्ज हसेज्जा तुवरेज्ज तुवरेज्जा । एवमन्येऽप्युदाहर्तव्याः ॥ २२ ॥ भूते काले धातोः प्रत्ययस्य ईअ इत्ययमादेशो भवति । हुवीअ हसीअ । अभवत् अहसत् ॥ २३ ॥ भूते काले एकाचो धातोः प्रत्ययस्य हीअ इत्यमादेशो भवति । होहीअ । अभूत् ॥ २४ ॥ अस्तेर्भूते काले एकस्मिन्नर्थे आसि इति निपात्यते । आसि राआ आसि बहू । आसीद्राजा आसीद्वधूः ॥ २५ ॥ णिच्प्रत्ययस्य एकारादेशो भवति धातोरादेरकारस्य च आत्वं भवति । कारेइ हासेइ पाढेइ । कारयति हासयति पाठयति ॥ २६ ॥ णिच आवे इत्ययमादेशो भवति चकारात् पूर्वोक्तं च । करावेइ हसावेइ पढावेइ कारावेइ इत्यादि ॥ २७ ॥ णिच आविरादेशो भवति वा क्तप्रत्यये परतो भावकर्मणोश्च । कराविअं हसाविअं पढाविअं कारिअं हासिअं पाढिअं । भावकर्मणोश्च, कराविज्जइ हसाविज्जइ पढाविज्जइ कारिज्जइ हासिज्जइ पाढिज्जइ । कारितम् हासितम् पाठितम् कार्यते हास्यते पाठ्यते॥२८॥क्तभावकर्मसु णिच्प्रत्ययस्य एत् आवे इत्येतावादेशौ न भवतः । कारिअं कराविअं कारिज्जई काराविज्जई ॥ २९ ॥ अकारान्ताद्धातोर्मिपि परत आकारादेशो भवति वा । हसामि हसमि ॥ ३० ॥

इश्च बहुषु ॥ ३१ ॥ क्ते ॥ ३२ ॥ ए च क्त्वातुमुन्तव्यभविष्यत्सु ॥३३॥ लादेशे वा ॥३४॥

इति सप्तमः परिच्छेदः ॥

अथाष्टमः परिच्छेदः ।

भुवो होहुवौ ॥ १ ॥ क्ते हुः ॥ २ ॥ प्रादेर्भवः ॥३॥ त्वरस्तुवरः ॥ ४ ॥ क्ते तुरः ॥ ६ ॥ घुणो घोलः णुदो णोल्लः ॥ ७ ॥ दूङो दूमः ॥ ८ ॥

मिपो बहुषु परतो ऽत इकारादेशो भवति चकारादाकारश्च । हसिमो हसामो हसिमु हसामु ॥ ३१ ॥ क्तप्रत्यये परतो ऽत इर्भवति । हसिअं पढिअं ॥ ३२ ॥ क्त्वा तुमन् तव्य इत्येतेषु भविष्यति काले च अत एत्वं भवति चकारादिश्च । हसेऊण । हसिऊण । हसेउं । हसिउं । हसेअव्वं हसिअव्वं हसेहिइ हसिहिइ।३३।लकारादेशे वा परतो ऽत एत्वं भवति वा हसेइ हसइ पढेइ पढइ हसेंति हसंति हसेउ हसउ ॥३४॥

इति प्राकृतप्रकाशे तिङ्विधिर्नाम

सप्तमः परिच्छेदः ॥

भू सत्तायाम् एतस्य धातोर्हो हुव इत्येतावादेशौ भवतः । होइ हुवइ होंति हुवंति ॥ १ ॥ भुवः क्तप्रत्यये परतो हु इत्यादेशो भवति । हुअं ॥ २ ॥ प्रादेरुत्तरस्य भुवो भव इत्ययमादेशो भवति । पभवइ उब्भवइ संभवइ परिभवइ ॥ ३ ॥ ञित्वरा संभ्रमे अस्य धातोस्तुवर इत्ययमादेशो भवति । तुवरइ ॥४॥ क्तप्रत्यये तुर इत्ययमादेशो भवति । तुरिअं ॥ ५ ॥ घुण घूर्ण भ्रमणे अस्य धातोर्घोल इत्ययमादेशो भवति । घोलइ ॥ ६ ॥ णुद प्रेरणे अस्य धातोर्णोल्ल इत्ययमादेशो भवति । णोल्लइ पणोल्लइ ॥ ७ ॥ दूङ् परितापे अस्य धातोर्दूमादेशो भवति । दूमइ ॥ ८ ॥

पटेः फलः ॥ ९ ॥ पदेः पालः ॥ १० ॥ वृषकृषमृषहृषामृतो ऽरिः ॥ ११ ॥ ऋतो ऽरः ॥ १२ ॥ कृञः कुणो वा ॥ १३ ॥ जृभो जंभाअः ॥ १४ ॥ ग्रहेर्गेण्हः ॥ १५ ॥ घेत् क्त्वातुमुन्तव्येषु ॥ १६ ॥ कृञः का भूतभविष्यतोश्च ॥ १७ ॥ स्मरतेर्भरसुमरौ ॥ १८ ॥ भियो भावीहौ ॥ १९ ॥ जिघ्रतेः पापाऔ ॥ २० ॥ म्लै वावाऔ ॥ २१ ॥ तृपस्थिपः ॥ २२ ॥ ज्ञो जाणमुणौ ॥ २३ ॥

पट गतौ अस्य धातोः फल इत्ययमादेशो भवति । फलिअं हिअअं ॥ ९ ॥ पद गतौ अस्य धातोः पाल इत्ययमादेशो भवति । पालेइ ॥ १० ॥ वृषादीनामृतः स्थाने अरि इत्यादेशो भवति । वरिसइ करिसइ मरिसइ हरिसइ ॥ ११ ॥ ऋकारान्तस्य धातोर्ऋतः स्थाने अर इत्यादेशो भवति । मृ,मरइ । सृ, सरइ । वृ, वरइ ॥१२॥ डुकृञ् करणे अस्य धातोः प्रयोगे कुणो वा भवति । कुणइ करइ ॥ १३ ॥ जभि जृभी गात्रविनामे अस्य धातोर्जंभाअ इत्ययमादेशो भवति । जंभाअइ ॥ १४ ॥ ग्रह उपादाने अस्य धातोर्गेण्हो भवति । गेण्हइ ॥१५॥ ग्रहेर्घेत् इत्ययमादेशो भवति क्त्वातुमुन्तव्येषु परतः । घेत्तूण घेत्तुं घेत्तव्वं ॥ १६ ॥ भूतभविष्यतोः कालयोः कृञः का इत्ययमादेशो भवति चकारात् क्त्वातुमुन्तव्येषु परतः । काहीअ काहिइ काऊण काउं काअव्वं ॥ १७ ॥ स्मृ चिन्तायाम् अस्य धातोर्भरसुमरौ भवतः । भरइ सुमरइ ॥१८॥ ञिभी भये अस्य धातोर्भावीहौ भवतः । भाइ बीहइ ॥ १९ ॥ घ्रा गन्धग्रहणे अस्य धातोः पा पाअ इत्यादेशौ भवतः । पाइ पाअइ ॥ २० ॥ म्लै हर्षक्षये अस्य धातोर्वावाऔ भवतः । वाइ वाअइ ॥ २१ ॥ तृप तृप्तौ अस्य धातोस्थिंपो भवति । थिंपइ ॥ २२ ॥ ज्ञा अवबोधने अस्य धातोर्जाणमुणौ भवतः । जाणइ मुणइ ॥ २३ ॥

जल्पेर्लो मः ॥ २४ ॥ ष्ठाध्यागानां ठाअझाअगा-आः ॥ २५ ॥ ठाझागाश्च वर्तमानभविष्यद्विध्या-द्येकवचनेषु ॥ २६ ॥ खादिधाव्योः खाधौ ॥ २७ ॥ ग्रसेर्विसः ॥ २८ ॥ चिञश्चिणः ॥ २९ ॥ क्रीञः किणः ॥ ३० ॥ वे क्के च ॥ ३१ ॥ उद्ध्मः उद्धु-मा ॥ ३२ ॥ श्रदो धो दहः ॥ ३३ ॥ अवाद् गा-हेर्वाहः ॥ ३४ ॥ कासेर्वासः ॥ ३५ ॥ निरो माङो माणः ॥ ३६ ॥ क्षियो झिज्जः ॥ ३७ ॥

जल्प व्यक्तायां वाचि अस्य धातोर्लकारस्य मकारो भवति । जंपइ ॥२४॥ ष्ठा गतिनिवृत्तौ ध्यै चिन्तायां गै शब्दे एतेषां ठाअ झाअ गाअ इत्येतआदेशा भवन्ति । ठाअंति झाअंति गाअंति ॥ २५ ॥ ष्ठाध्या-गानां ठा झा गा इत्यादेशा भवन्ति चकारात् पूर्वोक्ताश्च वर्तमानभ-विष्यद्विध्याद्येकवचनेषु परतः । ठाइ ठाअइ ठाहिइ ठाअहिय ठाउ ठा-अउ झाइ झाअइ झाहिइ झाअहिइ झाउ झाअउ गाइ गाअइ गाहिइ गाअहिइ गाउ गाअउ ॥ २६ ॥ खादृ भक्षणे धावु जवे एतयोर्धात्वोः खा धा इत्यादेशौ भवतः वर्त्तमानभविष्यद्विध्याद्येकवचनेषु । खाइ खा-हिइ खाउ धाइ धाहिइ धाउ ॥ २७ ॥ ग्लसु अदने अस्य धातो-र्विसो भवति । विसइ ॥२८॥ चिञ् चयने अस्य धातोश्चिणो भवति । चिणइ ॥ २९ ॥ डुक्रीञ् द्रव्यविनिमये अस्य धातोः किणो भवति । किणइ ॥ ३० ॥ वेरुत्तरस्य क्रीञः क्के आदेशः किणादेशश्च भव-ति । विक्केइ विक्किणइ ॥ ३१ ॥ ध्मा शब्दाग्निसंयोगयोः अस्य धातो-रुत्पूर्वस्य उद्धुमा भवति । उद्धुमाइ ॥ ३२ ॥ श्रच्छब्दादुत्तरस्य डुधाञ् धारणपोषणयोः अस्य धातोर्दहादेशो भवति । सद्दहइ सद्द-हिअं ॥ ३३ ॥ गाहू विलोडने अस्य धातोरवादुत्तरस्य वाहादेशो भवति । ओवाहइ अववाहइ ॥३४॥ अवादित्यनुवर्त्तते । कासृ शब्द-कुत्सायाम् कस्य धातोरवादुत्तरस्य वासो भवति । ओवासइ अववा-सइ ॥ ३५ ॥ माङ् माने अस्य धातोर्निरुत्तरस्य माणादेशो भवति । णिम्माणइ ॥ ३६ ॥ क्षि क्षये अस्य धातोर्झिज्जो भवति । झिज्जइ ॥३७॥

भिदिच्छिदोरन्त्यस्य न्दः ॥ ३८ ॥ क्वथेर्ढः ॥ ३९ ॥ वेष्टेश्च ॥ ४० ॥ उत्समोर्लः ॥ ४१ ॥ रुदेर्वः ॥ ४२ ॥ उदो विजः ॥ ४३ ॥ वृधेर्ढः ॥ ४४ ॥ हन्तेर्म्मः ॥ ४५ ॥ रुषादीनां दीर्घता ॥ ४६ ॥ च्चो व्रजनृत्योः ॥ ४७ ॥ युधिबुध्योर्झः ॥ ४८ ॥ रुधेर्न्धम्भौ ॥४९॥ मृदो लः ॥ ५० ॥ शदूलपत्योर्डः ॥ ५१ ॥ शकादीनां द्वित्वम् ॥ ५२ ॥ स्फुटिचल्योर्वा ॥ ५३ ॥ प्रादेर्मीलः ॥ ५४ ॥ भुजादीनां क्त्वातुमुन्त-

---

भिदिर् छिदिर् एतयोरन्त्यस्य न्दो भवति । भिन्दइ छिन्दइ ॥ ३८ ॥ क्वथ निष्पाके अस्य धातोरन्त्यस्य ढो भवति । कढइ ॥ ३९ ॥ वेष्ट वेष्टने अस्य धातोरन्त्यस्य ढो भवति । वेड्ढइ । योगविभाग उत्तरार्थः ॥४०॥ उत्संभ्यामुत्तरस्य वेष्टेरन्त्यस्य लो भवति । उव्वेल्लइ संवेल्लइ ॥ ४१ ॥ रुदिर् अस्य धातोरन्त्यस्य वो भवति । रुवइ ॥ ४२ ॥ उत्पूर्वस्य विजेरन्त्यस्य वकारो भवति उव्विवइ ॥ ४३ ॥ वृधु वर्धने अस्य धातोरन्त्यस्य ढो भवति । वड्ढइ ॥ ४४ ॥ हन्तेरन्त्यस्य म्मो भवति । हम्मइ ॥ ४५ ॥ रुषादीनां दीर्घता भवति । रूसइ तूसइ सूसइ । रुष्यति तुष्यति शुष्यति ॥ ४६ ॥ व्रजनृती अनयोरन्त्यस्य च्चो भवति । वच्चइ णच्चइ ॥ ४७ ॥ युध संप्रहारे बुध अवगमने अनयोरन्त्यस्य झो भवति । जुज्झइ बुज्झइ ॥ ४८ ॥ रुधिर् अन्त्यस्य न्धम्भौ भवतः । रुन्धइ रुम्भइ ॥ ४९ ॥ मृद क्षालने अस्य धातोरन्त्यस्य लो भवति । मलइ ॥५०॥ शदूल शातने पत्ल पतने अनयोरन्त्यस्य डो भवति । सडइ पडइ ॥५१॥ शक्ल शक्तौ इत्येवमादीनां द्वित्वं भवति । सक्कइ लग्गइ । शक्नोति लगति ॥५२॥ स्फुट विकसने चल कम्पने अनयोरन्त्यस्य वा द्वित्वं भवति । फुट्टइ फुडइ चल्लइ चलइ ॥ ५३ ॥ प्रादेरुत्तरस्य द्वित्वं भवति वा । पमिल्लइ पमीलइ ॥ ५५ ॥ भुज इत्येवमादीनां क्त्वातुमुन्तव्येषु परतोन्त्यस्य लोपो भवति । भोत्तूण भोत्तुं भोत्तव्वं । विदः, वेत्तूण वेत्तुं वेत्तव्वं । रुदः, रोत्तूणं

न्येषु लोपः॥५५॥श्रुहुजिलूधुवां णो ऽन्त्ये ह्रस्वः॥५६॥ भावकर्मणोर्व्वश्च ॥५७॥ गमादीनां द्वित्वं वा ॥५८॥ लिहेर्लिज्झ ॥ ५९ ॥ हृक्रोर्हीरकीरौ ॥ ६० ॥ ग्रहेर्दीर्घो वा ॥ ६१ ॥ क्तेन दिण्णादयः ॥ ६२ ॥ खिदेर्विसूरः ॥ ६३ ॥ क्रुधेर्जूरः ॥ ६४ ॥ चर्चे श्चंपः ॥ ६५ ॥ त्रसेर्वज्जः ॥ ६६ ॥ मृजेर्लुभसुपौ ॥ ६७ ॥ वुट्टखुप्पौ मस्जेः ॥ ६८ ॥ दृशेः पुलअ-णिअक्कअवक्खाः ॥ ६९ ॥

रोत्तुं रोत्तव्वं ॥ ५५ ॥ श्रु श्रवणे हु दानादाने जि जये लूञ् छेदने धूञ् कम्पने इत्येतेषामन्ते णः प्रयोक्तव्यः दीर्घस्य ह्रस्वो भवति । सुणइ हुणइ जिणइ लुणइ धुणइ ॥ ५६ ॥ एषां भावकर्मणोरन्त्ये व्वशब्दः प्रयोक्तव्यः चकारात् णश्च । सुव्वइ सुणिज्जइ हुव्वइ हुणिज्जइ जिव्वइ जिणिज्जइ लुव्वइ लुणिज्जइ धुव्वइ धुणिज्जइ ॥ ५७ ॥ गमादीनां धातूनां द्वित्वं वा भवति । गम्मइ गमिज्जइ रम्मइ रमिज्जइ हस्सइ हसिज्जइ । गम्यते रम्यते हस्यते ॥५८॥ लिह आस्वादने अस्य धातोर्लिज्झो भवति भावकर्मणोः । लिज्झइ ॥ ५९ ॥ हृञ् हरणे डुकृञ् करणे अनयोर्हीरकीरौ भवतो भावकर्मणोरर्थयोः । हीरइ कीरइ ॥ ६० ॥ ग्रहेर्धातोर्दीर्घो वा भवति भावकर्मणोरर्थयोः गाहिज्जइ गहिज्जइ ॥६१॥ दिण्ण इत्येवमादयः क्तप्रत्ययेन सह निपात्यन्ते । डुदाञ् दाने दिण्णं, रुदिर् रुण्णं, त्रसी हित्थं, दह दड्ढं रञ्जि रत्तं ॥६२॥ खिद दैन्ये अस्य विसूरो भवति । विसूरइ । विरहेण विसूरइ बाला ॥ ६३ ॥ क्रुध कोपे अस्य जूरो भवति जूरइ ॥ ६४ ॥ चर्च अध्ययने अस्य धातोश्चंपो भवति । चंपइ ॥ ६५ ॥ त्रसी उद्वेगे अस्य धातोर्वज्जो भवति । वज्जइ ॥ ६६ ॥ मृजू शुद्धौ अस्य धातोर्लुभ सुप इत्यादेशौ भवतः । लुभइ सुपइ ॥ ६७ ॥ टुमस्जो शुद्धौ अस्य धातोर्वुट्टखुप्पौ भवतः । वुट्टइ खुप्पइ ॥६८॥ दृशिर् प्रेक्षणे अस्य पुलअ णिअक्क अवक्खा भवन्ति । पुलअइ णिअक्कइ अवक्खइ ॥ ६९ ॥

शकेस्तरवअतीराः ॥७०॥ शेषाणामदन्तता ॥७१॥

इति अष्टमः परिच्छेदः ॥

अथ नवमः परिच्छेदः ।

निपाताः ॥ १ ॥ हुं दानपृच्छानिर्धारणेषु ॥२॥ विअ वेअ अवधारणे ॥ ३ ॥ ओ सूचनापश्चात्ताप-विकल्पेषु ॥४॥ इरकिरकिला अनिश्चिताख्याने।५। हुं क्खु निश्चयवितर्कसंभावनेषु ॥६॥

शक्लृ शक्तौ अस्य धातोः तर वअ तीर इत्येतआदेशा भवन्ति । तरइ वअइ तीरइ ॥ ७० ॥ शेषाणां लुप्तानुबन्धानामदन्तता भवति । भमइ चुंवइ ॥ ७१ ॥

इति प्राकृतप्रकाशे धात्वादेशपरिच्छेदो ऽष्टमः ॥

अधिकारो ऽयम् । वक्ष्यमाणा निपातसंज्ञका वेदितव्याः । संस्कृतानुसारेण निपातकार्यं वक्तव्यम् ॥१॥ हुं इत्ययं शब्दो दानपृच्छानिर्धारणेष्वर्थेषु निपातसंज्ञो भवति । दाने, यथा, हुं गेण्ह अप्पणो जीअं। पृच्छायाम् हुं, कधेहि साहुसु सब्भावं । निर्धारणे, हुं हुवसु तुण्हिक्को। हुं गृहाणात्मनो जीवम् । हुं कथय साधुषु सद्भावम् । हुं भव तूष्णीकः ॥२॥ विअ वेअ इत्येताववधारणे निपातसंज्ञौ भवतः।एवं विअ एवं वेअ । एवमेव ॥ ३ ॥ ओ इत्ययं शब्दः सूचनापश्चात्तापविकल्पेषु निपातसंज्ञो भवति । ओ चिरअसि । गाथासु द्रष्टव्यः ॥४॥ इर किर किल इत्येते शब्दा अनिश्चिताख्याने निपातसंज्ञका भवन्ति । पेक्ख इर तेण हदो । अज्ज किर तेण ववसिओ । अअं किल सिविणओ।प्रेक्षस्व किल तेन हतः । अद्य किल तेन व्यवसितः । अयं किल स्वप्नः ॥ ५ ॥ हुं क्खु इत्येतौ निश्चयवितर्कसंभावनेषु निपातसंज्ञकौ भवतः । हुं रक्खसो । गुरुओ क्खु भारो । हुं राक्षसः । गुरुः खलु भारः ॥ ६ ॥

णवरः केवले ॥ ७ ॥ आनन्तर्ये णवरि ॥ ८ ॥ किणो प्रश्ने ॥ ९ ॥ अव्वो दुःखसूचनासंभावनेषु ॥ १० ॥ अलाहि निवारणे ॥ ११ ॥ अइ वले संभाषणे ॥ १२ ॥ णवि वैपरीत्ये ॥ १३ ॥ सू कुत्सायाम् ॥ १४ ॥ रे अरे हिरे संभाषणरतिकलहाक्षेपेषु ॥ १५ ॥ म्मिवमिवविआ इवार्थे।१६। अज्ज आमन्त्रणे ॥ १७ ॥

णवरः इत्ययं शब्दः केवलेर्थे निपातसंज्ञो भवति। णवर अण्णं ॥७॥ णवरि इत्ययं शब्द आनन्तर्ये निपातसंज्ञो भवति। णवरि ॥८॥ किणो इत्ययं शब्दः प्रश्ने निपातसंज्ञो भवति। किणो धुव्वसि किणो हससि। किन्नु धूयसे किन्नु हससि ॥ ९ ॥ अव्वो इत्ययं शब्दो दुःखसूचनासंभावनेषु निपातसंज्ञो भवति। दुःखे,अव्वो कज्जलरसरंजिएहिं अच्छीहिं। सूचनायाम्,अव्वो अवरं विअ। संभावने,अव्वो णमिव अत्तुं। अहो कज्जलरसरञ्जिताभ्यामक्षिभ्याम्। अहो अपरमिव। अहो पनमिवात्तुम्।१०।अलाहि इत्ययं शब्दो निवारणे निपातसंज्ञो भवति। अलाहि कलहलेसेण। अलाहि कलहवंधेण। अलं कलहलेशेन। अलं कलहबन्धेन।११।अइ वले इत्येतौ शब्दौ निपातसंज्ञकौ भवतः। अइ मूलं पसूसइ वले किं कलेसि। अवले अपि मूलं प्रशुष्यति वले किं कलयासि अवले ॥ १२ ॥ णवि इत्ययं शब्दो वैपरीत्ये निपातसंज्ञो भवति। णवि तह पहसइ बाला। विपरीतं तथा प्रहसति बाला॥१३॥ सू इत्ययं शब्दः कुत्सायां निपातसंज्ञो भवति। सू सिविणो। धिक् स्वप्नः॥१४॥ रे अरे हिरे इत्येते शब्दाः संभाषणरतिकलहाक्षेपेषु निपातसंज्ञा भवन्ति यथासंख्यम्। रे मा करेहि णाओसि अरे दिट्ठोसि हिरे। मा कुरुष्व नागोसि अरे दृष्टोऽसि हि रे ॥ १५ ॥ म्मिव मिव विअ इत्येते शब्दा इवार्थे निपातसंज्ञका भवन्ति। गअणं म्मिव। गअणं मिव। गअणं विअ कसणं। गगनमिव कृष्णम्।१६। अज्ज इत्ययं शब्द आमन्त्रणे निपात्यते। अज्ज महाणुहाव किं करेसि। अहो महानुभाव किं करोषि॥१७॥

शेषः संस्कृतात् ॥ १८ ॥

इति नवमः परिच्छेदः ॥

अथ दशमः परिच्छेदः।

पैशाची ॥ १ ॥ प्रकृतिः शौरसेनी ॥ २ ॥ वर्गाणां तृतीयचतुर्थयोरयुजोरनाद्योराद्यौ ॥ ३ ॥ इवस्य पिवः ॥ ४ ॥ णो नः ॥ ५ ॥ ष्टस्य सटः ॥ ६ ॥ स्नस्य सनः ॥ ७ ॥ र्यस्य रिअः ॥ ८ ॥

उक्तादन्यः शेषः प्रत्ययसमासतद्धितलिङ्गवर्णादिविधिः शेषः संस्कृतादवगन्तव्यः। इह ग्रन्थविस्तरभयान्न दर्शितः ॥ १८ ॥

इति प्राकृतप्रकाशे निपातसंज्ञाविधिर्नाम

नवमः परिच्छेदः ॥

पिशाचानां भाषा पैशाची, सा च लक्ष्यणक्षणाभ्यां स्फुटीक्रियते ॥ १ ॥ अस्याः पैशाच्याः प्रकृतिः शौरसेनी। स्थितायां शौरसेन्यां पैशाचीलक्षणं प्रवर्त्तयितव्यम् ॥ २ ॥ वर्गाणां तृतीयचतुर्थयोर्णयोरयुक्तयोरनादौ वर्तमानयोः स्थाने आद्यौ प्रथमद्वितीयौ भवतः। गकनं मेखो राचा णिच्छरो वटिसं दसवतनो माथवो गोविंतो केसवो सरफसं सलफो। अयुजोरिति किम्। सग्गामो वग्घो इत्यादि। अनादाविति किम्। गमनं इत्यादि। गगनम् मेघः राजा निर्झरः वडिशम् दशवदनः माधवः गोविन्दः केशवः सरभसम् शलभः संग्रामः व्याघ्रः गमनम् ॥३॥ इवशब्दस्य स्थाने पिव इत्ययमादेशो भवति। कमलं पिव मुखं ॥ ४ ॥ णकारस्य स्थाने न इत्ययमादेशो भवति। तलुनी। तरुणी ॥ ५ ॥ ष्ट इत्यस्य स्थाने सट इत्ययमादेशो भवति। कसटं मम वट्टइ। कष्टं मम वर्तते ॥६॥ स्न इत्यस्य स्थाने सन इत्ययमादेशो भवति। सनानं सनेहो। स्नानं स्नेहः ॥ ७ ॥ र्य इत्यस्य स्थाने रिअ इत्ययमादेशो भवति। भारिआ भार्या ॥ ८ ॥

ज्ञस्य ञ्जः ॥ ९ ॥ कन्यायां न्यस्य ॥ १० ॥ ञ्ज ञ्च ॥ ११ ॥ राज्ञो राचि टाङसिङसूङिषु वा ॥ १२ ॥ क्त्वस्तूनं ॥ १३ ॥ हृदयस्य हितअकं ॥ १४ ॥

इति नवमः परिच्छेदः ॥

अथैकादशः परिच्छेदः ।

मागधी ॥ १ ॥ प्रकृतिः शौरसेनी ॥ २ ॥ षसोः शः ॥ ३ ॥ जो यः ॥ ४ ॥ चवर्गस्य स्पष्टता तथोच्चारणः ॥५॥ हृदयस्य हडक्कः ॥६॥

ज्ञ इत्यस्य स्थाने ञ्ज इत्ययमादेशो भवति विञ्जातो सव्वञ्जो । विज्ञातः सर्वज्ञः ॥ ९ ॥ कन्याशब्दे न्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति । कञ्ञा ॥ १० ॥ ञ्जशब्दस्य शौरसेनीसाधितस्य ञ्च इत्ययमादेशो भवति । कञ्चं । कार्यम् ॥११॥ राजन्शब्दस्य टा ङसि ङस् ङि इत्येतेषु परतो राचि इत्ययमादेशो वा भवति । राचिना रञ्जा राचिनो रञ्जो राचिनि रञ्जि । एतेष्विति किम् । राचा राचानं रञ्जो ॥१२॥ क्त्वाप्रत्ययस्य स्थाने तूनं इत्ययमादेशो भवति । दातूनं कातूनं घेत्तूनं हृदयशब्दस्य हितअकं निपात्यते । हितअकं हरसि मे तलुनि ॥१४॥

इति प्राकृतप्रकाशे पैशाचिको नाम
दशमः परिच्छेदः ॥

मागधानां भाषा मागधी, लक्ष्यलक्षणाभ्यां स्फुटीक्रियते ॥ १ ॥ अस्या मागध्याः प्रकृतिः शौरसेनी इति वेदितव्यम् ॥ २ ॥ षकारसकारयोः स्थाने शो भवति । माशे विलाशे । माषः विलासः ॥ ३ ॥ जकारस्य यकारो भवति । यायते । जायते ॥४॥ चवर्गो यथा स्पष्टस्तथोच्चारणो भवति । पलिचए गहिदच्छले वियले णिज्झले । परिचयः गृहीतच्छलः विजलः निर्झरः ॥ ५ ॥ हृदयस्य स्थाने हडक्को भवति । हडक्के आलले मम । हृदये आदरो मम ॥ ६ ॥

र्यर्जयोर्य्यः ॥ ७ ॥ क्षस्य स्कः ॥ ८ ॥ अस्मदः सौ हके हगे अहके ॥ ९ ॥ अत इदेतौ लुक् च ॥ १० ॥ क्तान्तादुश्च ॥ ११ ॥ ङसो हो वा दीर्घत्वं च ॥ १२ ॥ अदीर्घः संबुद्धौ ॥ १३ ॥ चिट्ठस्य चिष्ठः ॥ १४ ॥ कृञ्मृङ्गमां क्तस्य डः ॥ १५ ॥ क्त्वो दाणिः ॥१६॥ शृगालशब्दस्य शिआलाशिआलेशिआलकाः॥१७॥

र्यकारर्जकारयोः स्थाने य्यो भवति कय्ये दुय्यणे । कार्य्यम् दुर्जनः॥७॥ क्षस्य स्थाने स्ककारो भवति । लस्कशे दस्के । राक्षसः दक्षः ॥ ८ ॥ अस्मदः स्थाने सौ परतो हके हगे अहके इत्येते आदेशा भवन्ति हके हगे अहके भणामि । अहं भणामि ॥ ९ ॥ सावित्यनुवर्तते अकारान्ताच्छब्दात्सौ परत इकारैकारौ भवतः पक्षे लोपश्च । एशि लाआ एशे पुलिशे एष राजा एष पुरुषः ॥ १० ॥ क्तप्रत्ययान्ताच्छब्दात्सौ परतः उकारश्च भवति चकारादू इदेतौ लुक् च । हशिदु हशिदि हशिद । हसितः ॥ ११ ॥ ङसः षष्ठ्येकवचनस्य स्थाने हकारादेशो वा भवति तत्संयोगे च दीर्घत्वम् पुलिशाह धणे पुलिशश्श धणे । पुरुषस्य धनम् ॥ १२ ॥ अदन्तादित्येव अदन्ताच्छब्दादकारो दीर्घो भवति । संबुद्धौ पुलिशा आगच्छ माणुसा आगच्छ संबुद्धाविति किम् वह्मणश्श धणे । ब्राह्मणस्य धनम् ॥१३॥ चिट्ठस्य स्थाने चिष्ठ इत्ययमादेशो भवति । पुलिशे चिष्ठदि । पुरुषस्तिष्ठति ॥१४॥ डुकृञ् करणे मृङ् प्राणत्यागे गम्लृ गतौ एतेषां क्तप्रत्ययस्य स्थाने डकारो भवति कडे मडे गडे । कृतः मृतः गतः ॥ १५ ॥ क्त्वाप्रत्ययस्य स्थाने दाणि इत्ययमादेशो भवति शहिदाणि गडे । करिदाणि आअडे । सोढ्वा गतः कृत्वा गतः ॥ १६ ॥ शृगालशब्दस्य स्थाने शिआलादय आदेशा भवन्ति । शिआला आअच्छदि । शिआले आअच्छदि शिआलके आअच्छदि शृगाल आगच्छति ॥ १७ ॥

इति प्राकृतप्रकाशे मागध्याख्य एकादशः परिच्छेदः ॥

अथ द्वादशः परिच्छेदः ।

शौरसेनी ॥ १ ॥ प्रकृतिः संस्कृतम् ॥ २ ॥ अनादावयुजोस्तथयोर्दधौ ॥३॥ व्यापृते डः ॥४॥ पुत्रेपि क्वचित् ॥ ५ ॥ इ गृध्रसमेषु ॥ ६ ॥ ब्रह्मण्यविज्ञयज्ञकन्यकानां ण्यज्ञन्यानां ञ्‌जो वा ॥ ७ ॥ सर्वज्ञेङ्गितज्ञयोर्णः ॥ ८ ॥ क्त्व इअः ॥ ९ ॥ कृगमोर्दुअः ॥१०॥ णिर्ज्जश्शसोर्वा क्लीबे स्वरदीर्घश्च ॥११॥ भो भुजस्तिङि ॥ १२ ॥ न लृटि ॥ १३ ॥ ददातेर्दे दइस्स लृटि ॥ १४ ॥ डुकृञः करः ॥ १५ ॥ स्थश्चिट्ठः ॥ १६ ॥ स्मरतेः सुमरः ॥ १७ ॥ दृशेः पेक्खः ॥ १८ ॥ अस्तेरच्छः ॥ १९ ॥ तिपात्थि ॥ २० ॥ भविष्यति मिपा स्सं वा स्वरदीर्घत्वं च ॥ २१ ॥ स्त्रियामित्थी ॥ २२ ॥ एवस्य जेव्व ॥ २३ ॥ इवस्य विअ ॥ २४ ॥ अस्मदो जसा वअं च ॥ २५ ॥ सर्वनाम्नां ङे सित्वा ॥ २६ ॥ धातोर्भावकर्तृकर्मसु परस्मैपदम् ॥ २७ ॥ अनन्त्य एच्च ॥ २८ ॥ मिपो लोटि च ॥ २९ ॥ आश्चर्यस्याच्चरिअं ॥ ३० ॥ प्रकृत्या दोलादण्डदशनेषु ॥३१॥ शेषं माहाराष्ट्रीवत् ॥३२॥

इति प्राकृतप्रकाशे मनोरमायां वृत्तौ भामहविरचितायां शौरसेनीलक्षणं नाम द्वादशः परिच्छेदः ॥

समाप्तोयं ग्रन्थः ॥

शुभम् ।